


Sources of Indo-Aryan Lexicography

6


ŚĀRADĪYĀKHYA-NĀMAMĀLĀ

OF

HARṢAKĪRTI



CRITICALLY EDITED BY
M. M. PATKAR




DECCAN COLLEGE
Postgraduate and Research Institute
POONA

ŚĀRADĪYĀKHYA-NĀMAMĀLĀ

OF

HARṢAKĪRTI

CRITICALLY EDITED BY
MADHUKAR MANGESH PATKAR, B.A., PH.D.
Department of the Dictionary of Sanskrit,
Deccan College Postgraduate and Research Institute, Poona.



POONA
1951

CODE No. I. L. 23

First Edition, 1000 Copies, June 1951

Price Rs. 5

Pp. 1-47—Printed at the Poona University Press, Ganeshkhind, Poona 7.
Preface, Introduction and Glossary printed at the Samarth Bharat Press, Poona 2.
Published by—Dr. S. M. Katre, for the Deccan College
Postgraduate and Research Institute, Yeravda, Poona 6.

PREFACE

It gives me great pleasure to present to the world of scholars the present edition of the *Śāradīyākhyanāmamālā* of Harṣakīrti shortly after my edition of the *Anekārthatilaka* of Mahīpa published in the same Series in 1947. The work of preparing a critical edition of the *Śāradīyākhyanāmamālā* was entrusted to me in the year 1950 by Dr. S. M. KATRE, Director of the Deccan College Research Institute, Poona, for being included in the Institute's Series called the 'Contributory Studies towards A Dictionary of Sanskrit on Historical Principles' in general and the 'Sources of Indo-Aryan Lexicography' in particular. I started my work on the critical edition of the *ŚN* soon after it was entrusted to me by procuring five manuscripts of the work—four from the Government Manuscripts Library at the Bhandarkar Oriental Research Institute, Poona and one from the Manuscripts Library of the Deccan College Research Institute and having worked at it at different intervals, submitted to the Institute my press-copy early in January 1951. I am glad that the work is now available in print without any delay.

Before concluding the preface it is my pleasant duty to acknowledge with gratitude the help I received from several persons in bringing out this volume. In this connection my thanks are due to Dr. S. M. KATRE, for giving me an opportunity to edit for the second time a lexicographical work in the 'Sources of Indo-Aryan Lexicography' Series undertaken by the Institute. I am also thankful to Prof. P. K. GODE, M.A., Curator, Bhandarkar Oriental Research Institute, Poona, for the loan of the four manuscripts of the *ŚN* from the Government Manuscripts Library, and to Dr. R. G. HARSHE, D.LITT. (Paris), Registrar, Deccan College Research Institute, for allowing me the use of one manuscript of the work from the Institute's collection of manuscripts. I must also thank Miss Suman N. DHAVALE, G.A., but for whose help in the irksome task of preparing the glossary appended to the text, it would not have been possible for me to complete my press-copy so early. Lastly, I have to put on record my sincere thanks to Pt. K. V. K. SHARMA, Vyākaraṇavidvān, my colleague in the Sanskrit Dictionary Department,

for helping me in correcting the proofs with valuable suggestions at times and to Mr. S. R. PARANJPE, the enthusiastic Manager of the Poona University Press for the prompt and efficient printing of this work. The Samartha Bharat Press, Poona, also deserves my thanks for the printing of the preliminary portion and the glossary.

D. C. P. and R. Institute,
POONA, 6
7th April 1951

M. M. PATKAR

INTRODUCTION

The *Śāradīyākhyanāmamālā* or *Śāradīyābhidhānamālā*, as it is sometimes called, is a glossary of synonymous words and is divided into three kāṇḍas, each of which is again sub-divided into different vargas. Thus the first kāṇḍa is divided into 1 *devavarga*, 2 *vyomavarga* and 3 *dharāvarga*; the second is divided into 1 *aṅgavarga*, 2 *saṁyogādivarga*, 3 *saṁgītavarga* and 4 *paṇḍitavarga*. The last kāṇḍa is divided into 1 *brahmavarga*, 2 *rājavarga*, 3 *vaiśyavarga*, 4 *śūdravarga*, and 5 *saṁkīrṇavarga*. The whole work consists of about 465 stanzas.

The Author

The author of the work belonged to a Jain sect, his name being Harṣakīrti. He was a High Priest belonging to the *Nāgapurīyatapāgaccha* branch of the Jain priests,[1] and was the pupil of Candrakīrti, who was highly honoured by emperor Jehangir of Delhi, who ruled from A.D. 1545 to 1553. In his praśasti to the *Dhātupāṭhataraṅgiṇī*, Harṣakīrti gives the following list of persons in his line who were honoured by royal personages :—

1. Jayaśekhara, honoured by Hammīra (1301–1365 A.D.)
2. Vajrasena, honoured by Allāvadi[2] (1295–1316 A.D.)
3. Ratnaśekhara, honoured by Perojshah (1351–1388 A.D.)
4. Haṁsakīrti, honoured by Sikandara Shah, probably Sikandar Shah Lodi[3] (1488–1518)
5. Ānandarāya, obtained the title Rāya from Humayun (1530–1540)
6. Candrakīrti, teacher of Harṣakīrti, who wrote the present work. Candrakīrti was honoured by Shah Salem or Jehangir (1545–1553)
7. Padmasundaragaṇi, honoured by Akbar (1556–1605)
8. Pacca, honoured by a Hindu king named Māladeva, who was the ruler of Yodhapura i.e. modern Jodhpur. R. G. BHANDARKAR states that Māladeva was a prince of the Rāṭhoḍ family which ruled at Jodhpur from A.D. 1532 to 1583.[4]

Harṣakīrti's Works and Date

Harṣakīrti was a versatile writer and wrote on different subjects such as grammar, medicine, astrology and so on. Most of his writing

---

1. Cf. the colophon to the author's *Dhātupāṭhaṭīkā* which reads as follows :—

इति श्रीमन्नागपुरीयत्तपागच्छाधिप-भट्टारक-श्रीहर्षकीर्तिसूरि-

विरचितं स्वोपज्ञधातुपाठविवरणं सम्पूर्णम् । etc.

2. R. G. BHANDARKAR is inclined to identify Allāvadi with Allaudin Khilji. See *Report for 1882–83* p. 43.

3. Ibid.

4. Ibid, p. 44.

exists in the form of commentaries although the composition of original treatises is also ascribed to him. The following are some of the works[5] attributed to Harṣakīrti :—

1 *Bṛhacchāntistotraṭīkā* ; (composed in saṁvat 1655)[6] ; 2 *Kalyāṇamandirastotraṭīkā* ; (Ms. of saṁvat 1635)[7] ; 3 *Sindūraprakaraṇaṭīkā* ; 4 *Sārasvatadīpikā* ; 5 *Seṭaniṭkārikāvivaraṇa* (composed in saṁvat 1669); 6 *Dhātupāṭhataraṅgiṇī*; 7 *Dhātupāṭhavivaraṇa* ; 8 *Śāradīyākhyanāmamālā*; 9 *Śrutabodhaṭīkā* ; 10 *Yogacintāmaṇi* ; 11 *Vaidyakasāroddhāra* ; 12 *Jyotiḥsāra*[8] ; and 13 *Jyotissāroddhāra*[9].

Another work on lexicography viz. *Śabdānekārtha* is also attributed to Harṣakīrti[10]. In verse 34 on folio 85ᵇ of the India Office manuscript of this work it is stated that the glossary was composed by Harṣakīrti in saṁvat 1665 which corresponds to A.D. 1609. This verse reads as under:

बाणतर्करसग्लौ तु १६६५ वर्षे तपसि मासि च ।
राकायां हर्षकीर्त्याह्वसूरिश्चक्रे सतां मते ॥

Scholars differ in their opinion concerning the date of Harsakīrti. According to WEBER[11] Harṣakīrti, the author of the *Śāradīyākhyanāmamālā,* lived towards 'the end of the sixteenth century'. BELVALKAR[12] assigns the date 'circa 1560 A.D.' to Harsakīrti, probably relying on the fact that Harsakīrti was a pupil of Candrakīrti who was honoured by Salimshah alias Jehangir who ruled from A.D. 1545 to 1553. Judging, however, from the works ascribed to Harṣakīrti in the above list we are inclined to assign Harsakīrti a period 'between A.D. 1575 to 1625' for his literary activity. From the list of works ascribed to Harṣakīrti we come to know that he composed the *Bṛhacchāntistotraṭīkā* in saṁvat 1655 i.e. A.D. 1599, and the *Seṭaniṭkārikāvivaraṇa* in saṁvat 1669 or A.D. 1613.

---

5. M. D. DESAI in his '*Jain Gurjar Kaviō*' (vol. 1, p. 470) records the following information about Harṣakīrti, the pupil of Candrakīrti and his works :—

" पार्श्वचन्द्रगच्छना राजचन्द्रसूरि (जन्म सं. १६०६; आचार्य सं. १६२६; स्व. १६६९) ना समकालीन राजरत्नसूरिशिष्य चन्द्रकीर्तिसूरि हता. तेना शिष्य आ हर्षकीर्तिसूरिए पोताना गुरुना नामनी सारस्वतव्याकरणनी टीका, नवस्मरणनी टीका, सिन्दुरप्रकरटीका, शारदीयाख्यनाममालाकोश, धातुतरङ्गिणी, योगचिन्तामणि, वैद्यकसारोद्धार, वैद्यकसारसंग्रह, श्रुतबोधवृत्ति, तिजयपहुत्त अने बृहत्शान्तिपर वृत्तिओ तेमज सं. १६६३ मां अनिट्कारिकाविवरण अने सं. १६६८ मां कल्याणमन्दिरस्तववृत्ति आदि अनेक ग्रन्थो संस्कृतमां रच्या छे. "

6. R. MITRA : *Notices*, No. 3058.

7. *BBRAS. Des. Cat.* No. 1801.

8. *Cat. Cat.* i. 763ᵇ.

9. Ibid.

10. Vide *I. O. Cat.* No. 5175.

11. T. ZACHARIAE : *Indischen Wörterbucher*, 37

12. *Systems of Sanskrit Grammar*, 103.

It is also stated that a manuscript of *Nyāyāvatāra* was copied for him in saṁvat 1635 i.e. A.D. 1579.

It will be seen from the foregoing remarks that Harṣakīrti must have already commenced his literary studies in A.D. 1579 when he got a manuscript of *Nyāyāvatāra* copied for his use. It is also evident that his literary activity continued at least up to A.D. 1613 when he wrote his commentary on the *Seṭaniṭkārikā*. I am, therefore, inclined to assign a period of about fifty years roughly from A.D. 1575 to A.D. 1625 to the literary activity of Harṣakīrti.

Manuscript–material

The present edition of the *Śāradīyākhyanāmamālā* is based on five manuscripts, four from the Government manuscripts Library at the Bhandarkar Oriental Research Institute, designated as B_1 (= No. 1409 of 1887–91), B_2 (= No. 281 of 1873–74), B_3 (= No. 1382 of 1884–87) and B_4 (No. 780 of 1875–76). The fifth manuscript designated as D_1 belongs to the Deccan College Mss. Library. This manuscript being very corrupt had to be rejected after the 75th stanza of the second Kāṇḍa. All the manuscripts are written in Devanāgarī characters and with the exception of $B_{3,4}$ are dated as follows :—

B_1—*saṁvat 1760*, B_2–*saṁvat 1792* and D_1–*saṁvat 1723*. Unfortunately none of the five manuscripts utilized for this edition is complete and in some cases the readings had to be fixed with the help of the readings found in other lexicons.

हर्षकीर्तिविरचिता

शारदीयाख्यनाममाला

ॐ नमः ॥

प्रणम्य परमात्मानं सच्चिदानन्दमीश्वरम् ।
ग्रथ्नाम्यहं नाममालां मालामिव मनोरमाम् ॥ १ ॥

वाग्देवी शारदा ब्राह्मी भारती गीः सरस्वती ।
हंसयाना ब्रह्मपुत्री सा सदा वरदास्तु नः ॥ २ ॥

विनायकः पर्शुपाणिर्विघ्नराजो गजाननः ।
द्वैमातुर एकदन्तो लम्बोदरगणाधिपौ ॥ ३ ॥

गौरीसुतश्च हेरम्बस्तथा मूषकवाहनः ।
कार्यारम्भेषु सर्वेषु सिद्धिबुद्धिप्रदोऽस्तु सः ॥ ४ ॥

परमात्मा परब्रह्म परं ज्योतिरगोचरः ।
निरञ्जनश्चिरानन्दः परमः परमेश्वरः ॥ ५ ॥

देवाधिदेवः सर्वज्ञो वीतरागो जिनेश्वरः ।
तीर्थंकरो जगन्नाथो जिनोऽर्हन्भगवान्प्रभुः ॥ ६ ॥

सुगतः श्रीघनो बुद्धो बोधिसत्त्वस्तथागतः ।
द्वयवादी दशबलो जिनः सौ[शौ]द्धोदनिर्मुनिः ॥ ७ ॥

☞ The references in the critical apparatus are to the stanza-numbers

1 B1.2 missing. B3 ॐसिद्धिश्रीः.– d) D1 missing मालामिव.

2 B1.2 missing. – d) B4 adds (in marg. *sec m.*) सावित्री सारदा.

3 B1.2 missing.– b) B4 (marg. *sec. m.*) गणाधिपः for गजाननः.– c) D1 द्विमातुर.– d) B4 (marg. *sec. m.*) गजाननः for गणाधिपः.

4 B1.2 missing.– d) B4 नः for सः.

5 B1.2 missing.

6 B1.2 missing.– d) D1 missing अर्हन्.

7 B1.2 missing. – a) D1 श्रीनघो बुधो.

ब्रह्मा प्रजापतिः स्रष्टा विधिर्वेधाः पितामहः ।
हिरण्यगर्भो द्रुहिणः परमेष्ठी चतुर्मुखः ॥ ८ ॥

धाता विधाता लोकेशो विरञ्चिर्विश्वसृड्ध्रुवः ।
सुरज्येष्ठः कमलभूः स्वयंभूर्नाभिभूरजः ॥ ९ ॥

पद्मनाभादियोनिः क आत्मभूः कमलासनः ।
तत्पुत्रो नारदो वीणायुतो हंसश्च वाहनः ॥१०॥

श्रीपतिः केशवः कृष्णो गोविन्दो माधवोऽच्युतः ।
दामोदरो दैत्यरिपुर्विष्णुर्नारायणो हरिः ॥११॥

जनार्दनश्चक्रपाणिर्वासुदेवश्चतुर्भुजः ।
उपेन्द्रः पुण्डरीकाक्षो मुरारिः पुरुषोत्तमः ॥१२॥

पीताम्बरः पद्मनाभो मुकुन्दो मधुसूदनः ।
विश्वंभरो विश्वरूपो विश्व[ष्व]क्सेनो वृषाकपिः ॥१३॥

यदुनाथो हृषीकेशः शौरिः श्रीवत्सलाञ्छनः ।
वैकुण्ठ इन्द्रावरजो वनमाली त्रिविक्रमः ॥ १४ ॥

अब्धिशायी शेषशायी श्रीधरो गरुडध्वजः ।
जलशायी यज्ञमूर्त्यः[र्तिः] पुराणपुरुषः स्वभूः ॥ १५ ॥

अधोक्षजः कैटभजिद्बलिभिद्विष्टरश्रवाः ।
देवकीनन्दनः शार्ङ्गी कंसारिर्नरकान्तकृत् ॥ १६ ॥

---

8 B1.2 missing.

9 B1.2 missing.

10 B1.2 missing.– c) D1 वाणीसुता for वीणायुतो.– d) B3 वाहनं for वाहनः.

11 B1.2 missing.

12 B1.2 missing.

13 D1 missing विश्वक्सेनो.

14 B2 missing.

15 B2 missing.

16 B2 missing.–d) D1 बलिसिद्धि (?) for बलिभिद्.

गदाधरश्चक्रधरो गोवर्धनधरो विधुः ।
गोपीप्रियो गिरिधरः श्यामो गरुडवाहनः ॥ १७ ॥

यशोदातनयो राधावल्लभो नन्दनन्दनः ।
विठ्ठलो मोहनः कुञ्जविहारी द्वारकेश्वरः ॥ १८ ॥

महेश्वरो महादेवः श्रीकण्ठः शंकरः शिवः ।
उग्रः शूली मृडः शंभुस्त्र्यम्बकश्चन्द्रशेखरः ॥ १९ ॥

रुद्रस्त्रिलोचनः शर्वः स्थाणुर्गङ्गाधरो हरः ।
ईशान ईशो गिरिशो गिरीशः प्रमथाधिपः ॥ २० ॥

मृत्युंजयः पशुपतिः कृत्तिवासाः कपालभृत् ।
वामदेवो भवो भर्गः पिनाकी वृषभध्वजः ॥ २१ ॥

व्योमकेशः क्रतुध्वंसी भूतनाथ उमापतिः ।
अष्टमूर्तिर्नीलकण्ठः पुरभिन्नीललोहितः ॥ २२ ॥

षण्ढः कपर्दी सर्वज्ञो धूर्जटिस्त्रिपुरान्तकः ।
कृशानुरेता दिग्वासा अन्धकारिविषान्तकृत् ॥ २३ ॥

ष[ख]ण्डपर्शुर्विरूपाक्षो वरदो भाललोचनः ।
इन्दुमौलिः स्मरारिश्च भीमो वृषभवाहनः ॥ २४ ॥

लक्ष्मीः श्रीः कमला पद्मा मा रमा कमलालया ।
इन्दिरा हरिपत्नी सा लोकमाताब्धिनन्दिनी ॥ २५ ॥

---

17 B2 missing.
18 B2 missing.
19 B2 missing.
20 B2 missing.–a). B1 रौद्रः.
21 B2 missing.
22 B2 missing.
23 B2 missing.–a) B1D1 षण्डः for षण्ढः.
24 B2 missing.
25 B2 missing.–b) D1 कमलाशया.

ईश्वरी पार्वती गौरी भवानी हिमवत्सुता ।
उमा शिवाम्बिका दुर्गा काली कात्यायनीश्वरा ॥ २६ ॥

रुद्राणी चण्डिका चण्डी मृडानी मैनाकस्वसा ।
अपर्णार्या सती देवी गिरिजा सर्वमङ्गला ॥ २७ ॥

दाक्षायणी च शर्वाणी महामाया महेश्वरी ।
भैरवी भूतनाथा च शंकरी सिंहवाहना ॥ २८ ॥

अनङ्गो मदनः कामो मारः पञ्चशरः स्मरः ।
मनोभवो रतिपतिर्मन्मथो मकरध्वजः ॥ २९ ॥

पुष्पधन्वा मनसिजः कन्दर्पो विषमायुधः ।
सम्बरारिः सूर्पकारिर्दर्पको मीनकेतनः ॥ ३० ॥

अनन्यजो मधुसखः प्रद्युम्नः कुसुमायुधः ।
शृङ्गारयोनिः पुष्पेषुः संकल्पात्मा रमासुतः ॥ ३१ ॥

हृच्छयः कमनः कन्तुर्जराभीरुश्च तच्छराः ।
मोहनोन्मादनौ शोषणश्च तापनमारणौ ॥ ३२ ॥

कार्त्तिकेयो गुहः स्कन्दः सेनानीः पार्वतीसुतः ।
षाण्मातुरो महासेनः षण्मुखः शिखिवाहनः ॥ ३३ ॥

शरजन्माग्निभूः स्वामी विशाखः क्रौञ्चभेदनः ।
तारकारिः शक्तिधरः कुमारो बहुलात्मजः ॥ ३४ ॥

---

26 B2 missing.

27 B2 missing.

28 B2 missing. D1 missing महेश्वरी भैरवी भूतनाथा.–d) B3.4 शांकरी for शंकरी.

29 B2 missing.–b) B1 स्मृतः for स्मरः.

30 B2 missing. D1 missing संबरारिः सूर्पकारिः.

31 B2 missing.

32 B2 missing.–d) B4. (also marg. *sec.m.*) D1 ताडन° for तापन°.

33 B2 missing.–c) D1 षण्मातुरः.

विबुधा देवता देवास्त्रिदशा निर्जराः सुराः ।
आदित्या मरुतो लेखा निलिम्पा नाकिनोऽमराः ॥ ३५ ॥

वृन्दारकाः सुमनसः सुपर्वाणः सुधाभुजः ।
त्रिदिवेशा आदितेया अमर्त्या दानवारयः ॥ ३६ ॥

दिवौकसो दिविषदो गीर्वाणा अमृतान्धसः ।
अस्वप्ना ऋभवो बर्हिर्मुखाः क्रतुभुजोऽरुजः ॥ ३७ ॥

स्वः स्वर्गं त्रिदिवं नाकः सुरलोकस्त्रिविष्टपम् ।
सुरालयश्चोर्ध्वलोको द्यौर्गौस्तविषताविषौ ॥ ३८ ॥

इन्द्रः पुरंदरः शक्रो वासवः पाकशासनः ।
संक्रन्दनः सहस्राक्षः सुत्रामा मघवा वृषा ॥ ३९ ॥

आखण्डलः सुनासीरः पुरुहूतः शतक्रतुः ।
दिवस्पतिर्दुश्च[श्च्य]वनो जम्भारातिः शचीपतिः ॥ ४० ॥

जिष्णुर्वृद्धश्रवा वज्री बिडौजा नाकनायकः ।
बलारातिः सुरपतिर्मरुत्वान्मेघवाहनः ॥ ४१ ॥

प्राचीनबर्हिर्मघवाञ्शतमन्युः सुरर्षभः ।
ऋभुक्षा नमुचिद्विट् च वृत्रहा कौशिको हरिः ॥ ४२ ॥

वास्तोष्पतिस्तुराषाट् च पुलोमारिर्मरुत्सखः ।
गोत्रभेदी हरिहयो देवराजोऽस्य तु प्रिया ॥ ४३ ॥

---

35 B2 missing.
36 B2 missing.
37 B2 missing.–d) B1.3 D1 वह्निमुखाः.
38 B2 missing.–d) D1 ताविपो for ताषिपौ.
39 B2 missing.–ab) D1 missing शक्रो वासवः.
40 B2 missing.–a) B1 सुनाशीर.–d) B1 जंभाराति; D1 missing जंभारातिः.
41 –a) D1 जिष्णु.–b) B3 नायकः प्रभुः for नाकनायकः.–b) D1 missing बिडौजा नाक.
42 –a) B1.3 °वह्निः for °बर्हिः.–c) D1 om. च.
43 –b) B1 पुलौमा.–c) D1 °हयौ.

पुलोमजा शचीन्द्राणी पीयूषममृतं सुधा ।
हाहा हूहूश्च गन्धर्वौ विश्वकर्मा तु शिल्पिकृत् ॥ ४४ ॥

सुतो जयन्तः प्रासादो वैजयन्तोऽमरावती ।
पुरी सभा सुधर्मा च मातलिः सारथिर्हरेः ॥ ४५ ॥

ऐरावतो गजो वज्रमायुधं नन्दनं वनम् ।
उच्चैःश्रवा हयो यानं विमानं व्योमगामि च ॥ ४६ ॥

द्वारपालो देवनन्दी बृहस्पतिः पुरोहितः ।
स्वर्वैद्यावश्विनीपुत्रौ नारदाद्याः सुरर्षयः ॥ ४७ ॥

घृताची मेनका रम्भा मञ्जुघोषा तिलोत्तमा ।
उर्वशी च सुकेशी चेत्याद्या अप्सरसः स्मृताः ॥ ४८ ॥

संतानः पारिजातश्च कल्पश्च हरिचन्दनः ।
मन्दारश्चेति देवानां वृक्षाः पञ्च बुधैः स्मृताः ॥ ४९ ॥

विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥ ५० ॥

कुबेरो धनदः श्रीदो यक्षराजो धनाधिपः ।
किंनरेशो राजराजः पौलस्त्यो गुह्यकेश्वरः ॥ ५१ ॥

ऐलविलः शंभुसखः कुहः पुण्यजनेश्वरः ।
एकपिङ्गो वैश्रवणो निधीशो नरवाहनः ॥ ५२ ॥

---

44 –c) B1.2.4 गंधर्वौ.–d) B2 शिल्प–; D1 शल्प (corrupt).
45 –a) B1 सुतौ.
46 –d) D1 missing विमानं व्योमगामि.
47 –a) B5 missing द्वारपालो देवनंदी. –c) B5 missing अश्विनीपुत्रौ.
48 D1 missing उर्वशी .... चेत्याद्या.
49 –c) B2 कल्पद्रु for कल्पश्च; D1 missing कल्पश्च.
50 –a) D1 missing विद्याधराप्सरो. –d) D1 missing योनयः.
51 –a) B2 वृंदो (?) for श्रीदो.–b) B2 यक्षः for यक्ष°.–d) D1 पौलस्त्यौ.
52 –b) B2 'जिने' for 'जने'.

मनुष्यधर्मा कैलासनाथः किंपुरुषाधिपः ।
उत्तराशापतिः शक्रकोशाध्यक्षोऽलकापतिः ॥ ५३ ॥

वरुणः पाशभृच्चैव प्रचेता अब्धिमन्दिरः ।
यादःपतिर्जलपतिः पाशी पश्चिमदिक्पतिः ॥ ५४ ॥

यमः कृतान्तः शमनो धर्मराजः परेतराट् ।
समवर्ती श्राद्धदेवः कालः सूर्यसुतोऽन्तकः ॥ ५५ ॥

यमराजः पितृपतिर्मृत्युर्दक्षिणदिक्पतिः ।
कीनाशो यमुनाभ्राता दण्डभृन्माहिषध्वजः ॥ ५६ ॥

असुरा दानवा दैत्याः शुक्रशिष्याः सुरद्विषः ।
पूर्वदेवा दितिसुता दैत्येन्द्रा दनुजा अपि ॥ ५७ ॥

असुरा राक्षसा जातुधाना रक्षांसि नैर्ऋताः ।
रात्रिंचराः पुण्यजनाः पलादाश्चरक्तपाः ॥ ५८ ॥

॥ इति देववर्गः समाप्तः ॥

आकाशमभ्रं गगनं व्योम विष्णुपदं नभः ।
अम्बरं पुष्करं खं द्यौरन्तरिक्षं मरुत्पथः ॥ ५९ ॥

वियद्विहायोऽनन्तं च सुरवर्त्म घनाश्रयः ।
आदित्यः सविता सूर्यो रविर्भानुर्दिनेश्वरः ॥ ६० ॥

अर्कः सूरः खगः पूषा पतंगो भास्करो भगः ।
तपनस्तरणिर्मित्रश्चित्रभानुस्त्रयीतनुः ॥ ६१ ॥

---

54 –c) B2 D1 याद्° for यादः°.
55 B1 missing परेतराट्........न्तकः.
56 B1 missing.–a) D1 यमराज.
57 B1 missing.–d) B4 दितिजा (दनुजा in marg. *sec. m.*).
58 B1 missing –c) B2.4 रात्रि°.
Colophon · B3.4 om. the colophon.
59 B1 missing.–c) D1 द्यो for द्यौः.
60 B1 missing.
61 B1 missing.

सप्ताश्वोऽहस्करो भास्वान्द्वादशात्मा विरोचनः ।
प्रभाकरः सहस्रांशुर्मार्तण्डो मिहिरोऽर्यमा ॥ ६२ ॥

प्रद्योतनो जगच्चक्षुः कर्मसाक्षी दिवाकरः ।
हरिदश्वो हरिर्हेलिर्ब्रध्नो हंसो विकर्तनः ॥ ६३ ॥

उष्णरश्मिर्ग्रहपतिर्गभस्तिश्चक्रबान्धवः ।
इनोंऽशुमाली तीक्ष्णांशुः सप्तसप्तिर्विभाकरः ॥ ६४ ॥

नभोमणिर्धामपतिर्द्युमणिः पद्मिनीपतिः ।
पद्मबन्धुर्विवस्वांश्च ध्वान्तारातिरहर्पतिः ॥ ६५ ॥

तिमिरारिर्दिनकरो यमुनाजनकोऽरुणः ।
चन्द्रः सोमो मृगाङ्को ग्लौर्हिमांशुश्चन्द्रमाः शशी ॥ ६६ ॥

विधुः शशाङ्कः शीतांशुर्द्विजराजः सुधाकरः ।
जैवातृकः शशधरो नक्षत्रेशो निशाकरः ॥ ६७ ॥

ओषधीशो निशानाथ इन्दुः कुमुदिनीपतिः ।
अब्जो राजा चोडुपतिः कलानाथो हिमद्युतिः ॥ ६८ ॥

रोहिणीरमणः सिन्धुसुतः कुमुदबान्धवः ।
चन्द्रोद्योतः स्मृता ज्योत्स्ना चन्द्रिका कौमुदीन्दुरुक् ॥ ६९ ॥

नक्षत्रमृक्षं भं धिष्ण्यं तारा ज्योतिरुडुर्ग्रहः ।
मयूखः किरणो भानुर्मरीचिर्दीधितिः करः ॥ ७० ॥

---

62 B1 missing.–ab) D1 सप्ताश्वो........विरोचनः (in marg. *sec. m.*) ; –d) B3 D1 मिहर.
63 B1 missing.–d) B4 D1 °ब्रंध्नो.
64 B1 missing.
65 B1 missing.
66 B1 missing.
67 B1 missing.–a) D1 शीतांशु. –c) D1 शशीधरो. –d) B2 नशाकरः
68 B1 missing.–a) B4 औषधीशो.–b) B3 °प्रियः (in marg. *sec. m.*) for °पतिः.
69 B1 missing.
70 B1 missing.–b) B2.4 उडुग्रहः.

पादो गभस्तिरुस्रो गौर्ज्योतिर्धामांशुरश्मयः ।
अर्चिः पृश्णिर्घृणिस्तेजो भाः प्रभा त्विट् छविर्द्युतिः ॥ ७१ ॥

शोचिर्दीप्तिर्महो वर्चो रोचिर्भा रुग्रुचिर्वसुः ।
शिशिरः शीतलः शीतस्तुषारश्च हिमो जडः ॥ ७२ ॥

उष्णं तिग्मं खरं तीक्ष्णं चण्डं तीव्रं तथा पटुः ।
मङ्गलोऽङ्गारको भौम आरो वक्रः कुजः स्मृतः ॥ ७३ ॥

बुधस्तु सौम्यो ज्ञश्चान्द्रिर्गुरुर्जीवो बृहस्पतिः ।
वाचस्पतिः सुराचार्यो गीष्पतिर्धिषणोऽङ्गिराः ॥ ७४ ॥

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ।
शनिः शनैश्चरः शौरिर्मन्दश्छायासुतोऽसितः ॥ ७५ ॥

राहुस्तमः सैंहिकेयः स्वर्भाणु[नु]स्तु विधुंतुदः ।
केतुः शिखी चाहिकः स्याद्ध्रुवस्तूत्तानपादजः ॥ ७६ ॥

सप्तर्षयोऽत्रिप्रमुखा अगस्तिः कुम्भजोऽब्धिपः ।
अश्विन्यादीनि नक्षत्राण्यष्टाविंशतिसंख्यया ॥ ७७ ॥

लग्नानि राशयश्चैव मेषाद्या द्वादश स्मृताः ।
अहर्दिनं दिवं घस्रं दिवसो वासरो दिवा ॥ ७८ ॥

प्रातः प्रभातं प्रत्यूषो उषः कल्यमहर्मुखम् ।
रजनी यामिनी रात्रिस्त्रियामा शर्वरी निशा ॥ ७९ ॥

निशीथिनी क्षपा दोषा क्षणदा च विभावरी ।
अन्धकारं च तिमिरं ध्वान्तं संतमसं तमः ॥ ८० ॥

---

missing.–a) B2D1 गो for गौः.
missing.–d) B2 हिमौ for हिमो.
missing.
missing.–a) B2 बुद्धः for बुधः.–b) B2 जीवौ for जीवो.
missing.
missing. राहुस्तम .... केतुः.
b) B4 अब्धिजः; D1 अब्जजः.
a) B3.4 क्षिपा for क्षपा.

तमिस्रमन्धतमसं मूर्छाया तामसं रजः ।
क्षणः पलं घटी यामदिनमासर्तवोऽयनम् ॥ ८१ ॥

संवत्सरो युगः कल्पं कालस्येत्यादयो भिदाः ।
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्त एव च ॥ ८२ ॥

शिशिरश्चेति विज्ञेया ऋतवः षट् द्विमासिकाः ।
अब्दः संवत्सरो वर्षं वत्सरो हायनः शरत् ॥ ८३ ॥

कल्पो युगान्तः संहारः कल्पान्तः प्रलयः क्षयः ।
दिशा आशा दिशः काष्ठा हरितः ककुभश्च ताः ॥ ८४ ॥

चतस्रोऽष्टौ च दश वा स्युरिन्द्राद्यास्तदीश्वराः ।
पूर्वाग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा ॥ ८५ ॥

वायवी चोत्तरेशानी ब्राह्मी नागीति ता दश ।
वारिवाहो घनो मेघः स्तनयित्नुर्घनाघनः ॥ ८६ ॥

अभ्रं तडित्वान्मुदिरो जलमुग्जलदोऽम्बुभृत् ।
धाराधरो जलधरो धूमयोनिर्बलाहकः ॥ ८७ ॥

जीमूतो वारिदो नभ्राट् पर्जन्योऽम्भोधरोऽम्बुदः ।
विद्युत्सौदामिनी शम्पा चञ्चला चपला तडित् ॥ ८८ ॥

ऐरावती क्षणरुचिर्ह्लादिनी च शतहृदा ।
गर्जितं स्तनितं गर्जा रसितं मेघनिस्वनः ॥ ८९ ॥

बप्पीह (?) श्चातकसारङ्गस्तोककौ नभोऽम्बुपः ।
नीलकण्ठः शिखी केकी मयूरो जलमुक्सुहृत् ॥ ९० ॥

---

81 —a) B1 2.4 D1 तिमिश्र° for तमिस्र°. -c) D1 पल्यं.

83 —a) B1 शिशिरं. -ab) D1 in marg. *sec. m.* -D1 om. 83 bc.

84 —c) B2 दिशा for दिशः. -d) B1 ककुभाः.

87 —b) B1 जलदंबु° for जलदोऽम्बु°.

89 —a) B2 क्षणे° for क्षण. -d) B All mss. निस्वने.

शिखण्डी बर्हिणो बर्ही कलापी च भुजंगभुक् ।
परपुष्टा परभृता ताम्राक्षी कोकिला पिकी ॥ ९१ ॥

मधुरालापिनी श्यामा कलकण्ठी वनप्रिया ।
रथाङ्गाह्वश्चक्रवाकः कोको द्वंद्वचरश्च सः ॥ ९२ ॥

यामिनीविरहश्चक्रो रामशापनिशावियुक् ।
जीवंजीवश्चलचञ्चुश्चकोरो विषसूचकः ॥ ९३ ॥

ताम्रचूडः कुर्कुटश्च कृकवाकुः शिखण्डिकः ।
प्रभातज्ञो निशावेदी वृक्षाक्षश्चरणायुधः ॥ ९४ ॥

अनुवादी रक्ततुण्डः शुकः कीरः फलादनः ।
खञ्जनः खञ्जरीटश्च नीलश्चाषः किकीदिविः ॥ ९५ ॥

हंसो मरालश्चक्राङ्गो मानसौकाः शितच्छदः ।
हंसभेदा राजहंसाः कादम्बा धार्तराष्ट्रकाः ॥ ९६ ॥

तार्क्ष्यः सुपर्णो गरुडो वैनतेयोऽरुणानुजः ।
गरुत्मान्पक्षिराजश्च सर्पारिः कश्यपात्मजः ॥ ९७ ॥

खगो विहंगमः पक्षी विहंगो विहगो द्विजः ।
पत्री पतत्री शकुनिः शकुन्तः शकुनः पतत् ॥ ९८ ॥

विहायो विः पत्ररथो विकिरः पतगोऽण्डजः ।
नगौका नीडनिलयः खचरो विष्किरो वयः ॥ ९९ ॥

पक्षश्छदो गरुत्पत्रं पतत्रं च तनूरुहम् ।
वाजोऽस्य पक्षतिर्मूलं चञ्चुस्त्रोटिः सृपाटिका ॥ १०० ॥

---

94 —a) B4 कुक्कट.
95 —a) D1 रक्ततुंडी. –b) D1 पलादनः. –c) D1 खंजनं.
96 —d) B1.2 D1 धृत° for धार्त°.
98 —c) B2 शकुनी.
99 —a) B1 पत्ररथी.
100 —d) B2 चंचू for चञ्चुः.

वायुः समीरणो वातः समीरो मारुतो मरुत् ।
गन्धवाहो गन्धवहो मातरिश्वा प्रभञ्जनः ॥ १०१ ॥

सदागतिर्जगत्प्राणो नभस्वान्पवनोऽनिलः ।
श्वसनः पवमानश्च पृषदश्वः प्रकम्पनः ॥ १०२ ॥

अहिप्रियो दैत्यदेव आशुगः स्पर्शनोऽस्य तु ।
पुत्रौ भीमहनूमन्तौ झञ्झा वृष्टियुतो मरुत् ॥ १०३ ॥

॥ इति श्रीव्योमवर्गः समाप्तः ॥

विष्टपं भुवनं विश्वं जगल्लोकश्चराचरम् ।
मनुष्यलोकः संसारो नागलोको रसातलम् ॥ १०४ ॥

भूमिर्भूर्वसुधा पृथ्वी धरित्री धरणी धरा ।
मही वसुंधरा धात्री क्षोणी क्ष्मा मेदिनी क्षितिः ॥ १०५ ॥

विश्वंभरा वसुमती स्थिरानन्ताचलावनिः ।
सर्वंसहा क्षमा गोत्रा काश्यपी सागराम्बरा ॥ १०६ ॥

उर्वी ज्या कुर्भूतधात्री विपुला जगती रसा ।
इला गौ रत्नगर्भा च पृथिवी सिन्धुमेखला ॥ १०७ ॥

पर्वतः शिखरी क्ष्माभृन्नगः शैलोऽचलो गिरिः ।
अद्रिः शिलोच्चयो गोत्रो भूधरः सानुमान्धरः ॥ १०८ ॥

मेरुर्हिमालयो विन्ध्यः कैलासो मलयाचलः ।
उदयाद्री रोहणश्च लोकालोकादयो नगाः ॥ १०९ ॥

नीरं वारि जलं तोयं पानीयं सलिलं कुशम् ।
अम्भोऽर्णोऽम्बु पयः पाथः शम्बरं जीवनं वनम् ॥ ११० ॥

Colophon: B3.4 व्योमवर्गः. B2-4D1 om. समाप्तः.
104 D1 missing.
105 D1 missing.–a) B3 transp. भूमिः and भूः.
106 D1 missing.–c) B2 गोत्री.
107 D1 missing.
108 D1 missing.
109 D1 missing.
110 D1 missing.

उदकं पुष्करं क्षीरममृतं सर्वतोमुखम् ।
कङ्कबन्धं घनरसमापो वा कमलं विषम् ॥ १११ ॥

समुद्रः सागरः सिन्धुरुदधिः सरितां पतिः ।
वारिराशिरकूपारः सरस्वान्मकरालयः ॥ ११२ ॥

यादःपतिर्जलनिधिरुदन्वानब्धिरर्णवः ।
रत्नाकरो मितद्रुश्च पारावारो नदीश्वरः ॥ ११३ ॥

नदी तरङ्गिणी सिन्धुस्तटिनी निम्नगा धुनी ।
श्रो[स्रो]तस्विनी शैवलिनी स्रवन्ती ह्रदिनी सरित् ॥ ११४ ॥

कूलंकषा निर्झरिणी कर्षूः स्रोतोवहापगा ।
रोधोवक्रा जलधिगा द्वीपवत्यब्धिवल्लभा ॥ ११५ ॥

स्वर्नदी जाह्नवी गङ्गा त्रिस्रोता सुरदीर्घिका ।
मन्दाकिनी त्रिपथगा भीष्मसूर्वियदापगा ॥ ११६ ॥

भागीरथी विष्णुपदी पवित्रा हरशेखरा ।
कालिन्दी यमुना सौरी सूर्यपुत्री यमस्वसा ॥ ११७ ॥

उर्मिस्तरङ्गः कल्लोलो भङ्ग उत्कलिकावलिः ।
उल्लोलो लहरी वीचिरावर्तः पयसां भ्रमः ॥ ११८ ॥

ओघः स्रोतः प्रवाहश्च वेला स्याद्वृद्धिरम्भसः ।
कूलं तीरं तटं रोधः पुलिनं सैकतं च तत् ॥ ११९ ॥

बोहित्थं वहनं पोतो यानपात्रं वहित्रकम् ।
द्रोणी तु मङ्गिनी वेडा नौका नौस्तरणिस्तरी ॥ १२० ॥

---

111 D1 missing.–d) B1 बिसं for विषम्.
112 D1 missing.
113 —d) B3.4 वारपारः for मितद्रुश्च.
114 —d) B1-3 D1 श्रवंती for स्रवन्ती. B4 ह्रादिनी for ह्रदिनी.
117 —b) B2 D1 हरि° for हर°. –c) B2 D1 शौरी for सौरी.
118 D1 missing कल्लोलो .... भ्रमः.
119 D1 missing.–a) B1.2 श्रोतः for स्रोतः.

उडुपं तु प्लवः कोलस्तरण्डो भेल इत्यपि ।
निर्यामकः कर्णधारो नाविकः पोतवाहकः ॥ १२१ ॥

पृथुरोमा संघचारी मत्स्यो मीनो झषोऽण्डजः ।
वैसारिणो विसारी च शम्बरोऽनिमिषस्तिमिः ॥ १२२ ॥

पाठीनः शफरी शल्की रोहितश्च तिमिंगिलः ।
भेकमण्डूकवर्षाभूशालूरप्लवदर्दुराः ॥ १२३ ॥

कच्छपः कमठः कूर्मो दौलेयः कमठी दुलिः ।
यादांसि जलजीवाः स्युस्ते नक्रमकरादयः ॥ १२४ ॥

उदपानं प्रहिः कूपश्चान्धुर्वापी तु दीर्घिका ।
पुष्करिणी खातकं च निपानं तु जलाश्रयः ॥ १२५ ॥

सरस्तडागः कासारः सरसी च सरोवरः ।
पद्माकरः स एव स्याद्वसन्तः पल्वलं लघु ॥ १२६ ॥

कमलं पुष्करं पद्ममरविन्दं कुशेशयम् ।
अम्भोरुहं तामरसं राजीवं च महोत्पलम् ॥ १२७ ॥

वि[बि]सप्रसूनं नलिनं शतपत्रं सरोरुहम् ।
सहस्रपत्रं जलजं सरोजं सरसीरुहम् ॥ १२८ ॥

पङ्केरुहं सरसिजमब्जं वारिजमम्बुजम् ।
नालीकं पङ्कजाम्भोजे कजं चाह्नि विकासभाक् ॥ १२९ ॥

रक्तोत्पलं कोकनदं पुण्डरीकं सिताम्बुजम् ।
पद्मिनी च कमलिनी नलिनी बिस[सि]नीत्यपि ॥ १३० ॥

---

122 —d) B1 संबरो for शम्बरो.

125 —a) B2 प्रहिकूपं.

128 —d) B1.3.4 D1 सरसिरुहं.

129 B1 missing अह्निविकासभाक्.

130 B1 missing.–d) B2 om. नलिनी.

अम्भोजिनी नीरजिनी पङ्कजिन्यब्जिनी स्मृता ।
अथोत्पलं कुवलयं कुमुदं कैरवं सितम् ॥ १३१ ॥

इन्दीवरं च तन्नीलोत्पलं रात्रिविकासभाक् ।
कुमुद्वती कुमुदिनी कैरविणी शशिप्रिया ॥ १३२ ॥

दण्डो नालं मृणालं च बिसतन्तुश्च तन्तुलम् ।
द्विरेफो भ्रमरो भृङ्गो रोलम्बोऽलिः शिलीमुखः ॥ १३३ ॥

इन्दिन्दिरश्चञ्चरीकः षट्पदश्च मधुव्रतः ।
मधुपोऽली[लिः] मधुकरो मधुलिट् पुष्पलिट् स्मृतः ॥१३४॥

वल्ली प्रतानिनी वीरुद्व्रततिर्वल्लरी लता ।
पुष्पं प्रसूनं कुसुमं सूनं सुमनसः सुमम् ॥ १३५ ॥

मकरन्दः पुष्परसः परागं पुष्पजं रजः ।
पत्रं पर्णं दलं बर्हं पलाशं छदनं छदः ॥ १३६ ॥

नवं तत्स्यात्किसलयं प्रवालः पल्लवो नवः ।
फुल्लं विकसितं स्मेरं प्रबुद्धं विकचं स्मृतम् ॥ १३७ ॥

उज्जृम्भितं चोन्मिषितं हसितं च विजृम्भितम् ।
स्फुटं प्रफुल्लमुत्फुल्लं विनिद्रं दलितं तथा ॥ १३८ ॥

संकुचित मीलितं च निद्राणं मुद्रितं स्मृतम् ।
पण्ड आराम उद्यानं विपिनं काननं वनम् ॥ १३९ ॥

वाटिकोपवनं दावः कक्षः कान्तारनिःकुटौ ।
अटव्यरण्यं गहनं सान्द्रे कुञ्जो निकुञ्जवत् ॥ १४० ॥

---

131 B1 missing.
132 B1 missing. –d) B2 कैरवण्यं for कैरविणी.
133 B1 missing.
134 B1 missing.
135 B1 missing.–a) B2 वल्लि॰ for वल्ली.
136 B1 missing –a) D1 मकरन्दं.
137 B1 missing.–d) D1 स्मितं for स्मृतम्.
138 B1 missing.
139 B1 missing

वृक्षो द्रुमस्तरुः शाखी पादपश्च महीरुहः ।
अनोकहोऽङ्घिपः सालः पलाशी विटपी कुटः ॥ १४१ ॥

अगो नगोऽगमो द्रुश्च फलवांश्च वनस्पतिः ।
केतकः केतकी जाती चम्पको मल्लिका जपा ॥ १४२ ॥

बन्धुको यूथिका कुन्द इत्याद्याः पुष्पजातयः ।
आम्रो रसालो माकन्दः सहकारश्चूतनूतवत् (?) ॥ १४३ ॥

रम्भा तु कदली मोचा समौ करकदाडिमौ ।
गन्धसारो मलयजः श्रीखण्डश्चन्दनद्रुमः ॥ १४४ ॥

तैलपर्णिकमेवेदं गोशीर्षं हरिचन्दनम् ।
सर्पो भुजंगो भुजगः पन्नगोऽहिर्भुजंगमः ॥ १४५ ॥

उरगो जिह्मगो भोगी दन्दशूकः सरीसृपः ।
दर्वीकरो विषधरो द्विजिह्वः पवनाशनः ॥ १४६ ॥

काकोदरो दीर्घपृष्ठः पृदाकुः कुण्डली फणी ।
आशीविषो गुप्तपादो व्यालो नागो बिलेशयः ॥ १४७ ॥

चक्षुःश्रवाः काद्रवेयः सर्पराजस्तु वासुकिः ।
शेषो नागाधिपोऽनन्तः सहस्रवदनश्च सः ॥ १४८ ॥

विषस्तु गरलं क्ष्वेडो रसरतीक्ष्णश्च तद्भिदः ।
हालाहलः कालकूटो वत्सनागः प्रदीपनः ॥ १४९ ॥

सौराष्ट्रिको ब्रह्मपुत्रः काकोलो दरदोऽपि च ।
मृगः कुरङ्गो हरिण एणः सारङ्ग एव च ॥ १५० ॥

---

141 B1 missing
142 B1 missing.
143 B1 missing.
144 B1 missing;–d) D1 समो for समौ.
145 B1 missing.
146 B1 missing
147 B1 missing.
148 B1 missing
149 B1 missing.
150 B1 missing

ायुः कृष्णसारश्च रुरुमुख्यास्तु तद्भिदः ।
हो मृगेन्द्रः पारीन्द्रो हर्यक्षः केसरी हरिः ॥ १५१ ॥

ठीरवो महानादो मृगारिर्नखरायुधः ।
ाननो गजारातिः पुण्डरीकस्तु चित्रकः ॥ १५२ ॥

पी व्याघ्रश्चित्रकायः शार्दूलः शरभोऽष्टपाद् ।
ो मतङ्गजो हस्ती मातङ्गः कुञ्जरः करी ॥ १५३ ॥

ः स्तम्बेरमः कुम्भी दन्ती दन्तावलो द्विपः ।
रदः सिन्धुरो नागः सामयोनिर्महामृगः ॥ १५४ ॥

नेकपश्च करटी करेणुः पीलुवारणौ ।
टकस्तुरगो वाजी तुरंगोऽश्वस्तुरंगमः ॥ १५५ ॥

र्वा वाहो हयः सप्तिर्गन्धर्वो वीतिरेव च ।
म्बोजाः सैन्धवा देश्या अ[आ]जानेया वनायुजाः ॥ १५६ ॥

श्वा वामी च वडवा किशोरो बालघोटकः ।
नश्च शकटो गन्त्री शताङ्गः स्यन्दनो रथः ॥ १५७ ॥

बिका याप्ययानं च दोला प्रेङ्खा सुखासनम् ।
हनं धोरणं यानं पत्रं युग्यं गतिर्ध्वजः ॥ १५८ ॥

जश्च केतनं केतुः पताका चिह्नमेव च ।
र्गोऽध्वा निगमः पन्था पदवी वर्त्म पद्धतिः ॥ १५९ ॥

यनं सरणिः पथ्या रथ्या वीथी च संचरः ।
क्षा गौर्वृषभोऽनड्वान्भद्रः शार्करशर्करौ ॥ १६० ॥

---

issing.
issing.
issing.–c) B2 मातंगजो for मतङ्गजो.–d) B2 कुंजरी for कुञ्जरः.
ssing. –d) B2 श्यामयोनिः for सामयोनिः.
issing. –c) B1 तुरंगः for तुरगः.
issing.
issing.
issing.
issing.
issing. –b) B 2 मंचरं for संचरः.

बलीवर्दः सौरभेयः ककुद्मान्शांकरो वृषः ।
सुरभिर्गौरनड्वाही सौरभेयी च रोहिणी ॥ १६१ ॥
तम्पा तम्बार्जुनी धेनुर्माहेयी च निलिम्पिका ।
क्रमेलकोष्ट्रकरभा दासेरः कण्टकाशनः ॥ १६२ ॥
वराहः शूकरः कोलो गर्दभो रासभः खरः ।
कुक्कुरः सारमेयः श्वा भषणः श्वानमण्डलः ॥ १६३ ॥
शाखामृगो मर्कटश्च वनौका वानरः कपिः ।
शृगालो जम्बुकः क्रोष्टा फेरुगोमायुफेरवाः ॥ १६४ ॥
उरभ्रो मेण्ढको मेष एडकोऽविहुडोरणाः ।
अजस्तु छगलश्छागश्छगो बस्तः स्तभः पशुः ॥ १६५ ॥
अग्निर्वह्निर्बृहद्भानुर्दहनो ज्वलनोऽनलः ।
वैश्वानरः कृष्णवर्त्मा चित्रभानुर्धनंजयः ॥ १६६ ॥
आशुशुक्षणिरग्निस्त्वं जातवेदा हुताशनः ।
हव्यवाहो हुतवहो बर्हिः शुष्मा विभावसुः ॥ १६७ ॥
आश्रयाशो वायुसखः पावको हुतभुक्शिखी ।
वृषाकपिर्वीतिहोत्रः कृशानुश्छागवाहनः ॥ १६८ ॥
हिरण्यरेताः सप्तार्चिः शोचिष्केशस्तनूनपात् ।
कृपीटयोनिर्दमुना रोहिताश्व उषर्बुधः ॥ १६९ ॥
स्वाहापतिः शुचिः शुक्रो बर्हिर्ज्योतिर्विरोचनः ।
ज्वालाजिह्वः सप्त मन्त्रः शुष्मा धूमध्वजोऽपि च ॥ १७० ॥

---

161 B1 missing. -d) B2D1 सौरभेया for सौरभेयी.
162 B1 missing.
163 B1 missing.
164 B1 missing.-c) D1 क्रोष्ट्री for क्रोष्टा.
165 B1 missing.
166 B1 missing.-b) B2 ज्वलः for अनलः.
167 B1 missing.-d) D1 वह्निः for बर्हिः.
168 B1 missing.
169 B1 missing.
170 B1 missing.

वडवानल औेर्वश्च वाडवो वडवामुखः ।
संवर्तकः समुद्राग्निर्दवो दावो वनानलः ॥ १७१ ॥
सुवर्णं कनकं स्वर्णं हिरण्यं हेम काञ्चनम् ।
चामीकरं शातकौम्भं गाङ्गेयं भर्म हाटकम् ॥ १७२ ॥
कार्तस्वरं जातरूपं कलधौतं च कर्बुरम् ।
तपनीयं च कल्याणं रुक्मं जाम्बूनदं वसु ॥ १७३ ॥
अष्टापदं भूरिचन्द्रो महारजतमूत्तमे ।
दुर्वर्णं रजतं रूप्यं तारं खर्जूरमित्यपि ॥ १७४ ॥
रत्नं वसु मणिस्तस्य भेदा मरकतादयः ।
वैडूर्यवज्रमाणिक्यनीलमौक्तिकविद्रुमाः ॥ १७५ ॥
द्रव्यं स्वं द्रविणं वित्तं द्युम्नं रा विभवो धनम् ।
अर्थो लक्ष्मीः स्वापतेयं रिक्थमृक्थ तथा वसु ॥ १७६ ॥
भूतिर्विभूतिरैश्वर्यमणिमादिकमष्टधा ।
अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः ॥ १७७ ॥
महापद्मस्तथा पद्मः शङ्खो मकरकच्छपौ ।
मुकुन्दकुन्दौ नीलश्च खर्वश्च निधयो नव ॥ १७८ ॥
अस्यां श्रीहेममालायां हर्षकीर्तिकवेः कृतौ ।
देवव्योमधरावर्गैः काण्डोऽयं प्रथमोऽजनि ॥ १७९ ॥

इति श्रीहर्षकीर्त्युपाध्यायविरचितायां शारदीयाभिधायां लघुनाममालायां प्रथमः काण्डः ॥ १ ॥

---

171 B1 missing.–a) B2 वाडवानल for वडवानल. D1 ऊर्ध° for और्व°. –b) B2 वडवानलः for वडवामुखः.–c) D1 संवर्तकाः for संवर्तकः.
172 B1 missing.–b) B3 हाटकं for काञ्चनं.–d) B2 कांचनं for हाटकम्.
173 B1 missing.–d) B4 D1 जंबू° for जम्बु°.
174 B1 missing.–c) B2 रूपं for रूप्यं.
175 B1 missing.–c) B2 माणिक्यं for माणिक्य–.–B2 मुक्तिकः for मौक्तिक–.
176 B1 missing.
177 B1 missing.–a) B2 वीतिः for विभूतिः.
178 B1 missing. –d) All mss. read चर्चश्च (corrupt) for खर्वश्च.
Colophon: B1 missing; B3 हर्षकीर्तिसूरिविर°.

मनुष्यो मानवो मर्त्यो मनुजो मानुषो नरः ।
ना विट् पञ्चजनो भूस्पृक् पुरुषः पूरुषः पुमान् ॥ १ ॥

स्त्री नारी वनिता योषा ललना महिलाबला ।
कामिनी भामिनी रामा रमणी च नितम्बिनी ॥ २ ॥

अङ्गना मानिनी योषिद्वर्णिनी वामलोचना ।
बाला सीमन्तिनी भीरुः सुन्दरी युवती वशा ॥ ३ ॥

मृगाक्षी प्रमदा भामा मुग्धा वामा विलासिनी ।
कृशोदरी पुरन्ध्री च तन्वी लीलावती वधूः ॥ ४ ॥

उपयामः परिणयो विवाहः पाणिपीडनम् ।
पाणिग्रहणमुद्वाहो दारकर्म विवाहनम् ॥ ५ ॥

भर्ता विवोढा रमणो भोक्ता नाथः पतिर्धवः ।
वरो वरयिता कान्तो वल्लभो दयितः प्रियः ॥ ६ ॥

प्राणेशः प्रणयी प्रेयान्प्रेष्ठः प्राणसमोऽधिकः ।
प्रीतः प्रियतमः सेक्ता आर्यपुत्रश्च नायकः ॥ ७ ॥

भार्या सहचरी पत्नी वल्लभा प्रेयसी प्रिया ।
कान्ता जाया जनी जानिर्गृहं दाराः परिग्रहः ॥ ८ ॥

ऊढा पाणिगृहीता च कलत्रं गृहिणी वधूः ।
दयिता च प्रियतमा द्वितीया च सधर्मिणी ॥ ९ ॥

पिता तु जनकस्तातो वप्ता जनयितापि च ।
अम्बा माता सवित्री च जनयित्री जनन्यपि ॥ १० ॥

नन्दनस्तनयः पुत्रो दारकः सूनुरुद्वहः ।
सुतोऽङ्गज आत्मजश्च पुत्री तु दुहिता सुता ॥ ११ ॥

---

1 B1 missing.–b) B2 मानवो for मानुषो.
2 B1 missing.
3 B1 missing.
4 — a) B2 repeats दरी.–b) B2 पुरंदरी for पुरन्ध्री.

बालः स्तनंधयः पोतः पाको डिम्भोऽर्भकः शिशुः ।
कुमारः पृथुकः शावः क्षीरकण्ठः किशोरकः ॥ १२ ॥

कुमारी कन्यका कन्या बालिका दिक्करी कनी ।
तोकापत्ये प्रसूतिस्तुक् संतानं संततिः प्रजाः ॥ १३ ॥

भ्राता सहोदरो बन्धुः सहजो बान्धवोऽपि च ।
भगिनी तु स्वसा जामिर्दंपती दयितापती ॥ १४ ॥

वंशोऽन्वयः कुलं गोत्रं जननाभिजने अपि ।
सती पतिव्रता साध्वीं दासी चेटी च चेटिका ॥ १५ ॥

दूती संचारिका चुन्दी कुट्टिनी सम्भली समाः ।
पण्यस्त्री गणिका वेश्या रूपाजीवा पणाङ्गना ॥ १६ ॥

असती पांशुलाशीला स्वैरिणी कुलटेत्वरी ।
पुंश्चली बन्धुकी धृष्टा चर्षणी व्यभिचारिणी ॥ १७ ॥

मित्रं सखा सहचरौ वयस्यः सवयाः सुहृत् ।
आली सखी वयस्या च सध्रीची सहचारिणी ॥ १८ ॥

शरीरं विग्रहो देहो गात्रं क्षेत्रं तनुस्तनूः ।
अङ्गः कायो वपुर्वर्ष्म मूर्तिर्वेरं कलेवरम् ॥ १९ ॥


संहननं घनो बन्धः पुरः पिण्डं च पुद्गलम् ।
हृषीकमक्षं करणं ग्रहणं च खमिन्द्रियम् ॥ २० ॥

आत्मा जीवोऽशुमाञ्जन्तुर्देही प्राणी च चेतनः ।
जन्युः शरीरी पुरुषो हंसः सत्त्वं पुनर्भवा (?) ॥ २१ ॥

स्वान्तं चित्तं मनश्चेतो मानसं हृदयं च तत् ।
अन्तःकरणमप्यस्य संकल्पश्च मनोरथः ॥ २२ ॥

---

18 —b) B4 सवयः.
19 D1 missing.
20 D1 missing.–a) B3 बन्धुः for बन्धः.–d) B2 चक्षुरिंद्रियम् for च खमिन्द्रियम्.
21 D1 missing.
22 D1 missing.



शीर्षकं मस्तकं मुण्डं मौलिर्मस्तं च मस्तिकम् ।
उत्तमाङ्गं शिरो मूर्धा करणत्राणमेव च ॥ २३ ॥

केशा बालाश्च चिकुरा अलकाः कुन्तलाः कचाः ।
शिरोरुहास्तीर्थवाका मूर्धजास्तत्समुच्चये ॥ २४ ॥

केशात्कलापरचनापाशभारचया अपि ।
कवरी वेणिका वेणी धम्मिल्ला गुम्फिताः कचाः ॥ २५ ॥

केशेषु वर्त्म सीमन्तः कुरलो भ्रमरालकः ।
शिखा शिखण्डिका चूडा बालानां काकपक्षकः ॥ २६ ॥

मुखकेशाः श्मश्रु कूर्चो लोम रोम तनूरुहम् ।
रोमावली रोमलता रोमराजी ह्रदूदरे ॥ २७ ॥

मुखं तु वदनं वक्त्रं तुण्डमास्यं तथाननम् ।
ललाटमलिकं भालं गोध्यलीके ललाटिका ॥ २८ ॥

कर्णः श्रोत्रं श्रवणं च शब्दग्राहः श्रुतिः श्रवः ।
नक्रं तु नासिका नासा घ्राणं घोणा च शिङ्घिनी ॥ २९ ॥

नयनं लोचनं नेत्रमीक्षणं चक्षुरम्बकम् ।
अक्षि दृग्दृष्टिरस्यान्तस्तारका च कनीनिका ॥ ३० ॥

अर्धदृग्वीक्षणं काक्षः कटाक्षोऽपाङ्गदर्शनम् ।
क्रोधाद्भवो विकारो यो भ्रकुटिर्भ्रूकुटिश्च सा ॥ ३१ ॥

पक्ष्म स्यान्नेत्ररोमाणि भ्रूरूर्ध्वं रोमपद्धतिः ।
गल्लो गण्डः कपोलश्च चिबुकं त्वधरादधः ॥ ३२ ॥

---

23 D1 missing.–d) B1 करणः त्राण° for करणत्राण°.
24 D1 missing.
25 D1 missing.
26 D1 missing.–d) B3.4 °पक्षकं.
27 D1 missing.–a) B4 कूर्चं.–b) B1 in marg. *sec. m.*
28 D1 missing.–c) B1 ललाटः.
29 D1 missing.
30 D1 missing.
31 D1 missing.–b) B2 अनंग° for अपाङ्ग°. –c) B1 क्रोधाद्भुवो.
32 D1 missing.

ओष्ठोऽधरो दन्तवस्त्रं तथा च रदनच्छदम् ।
रदना दशना दन्ता द्विजा दंशा रदा अपि ॥ ३३ ॥

जिह्वा रसज्ञा रसना कण्ठो निगरणो गलः ।
अंशः स्कन्धो भुजशिरो बाहुर्बाहा च दोर्भुजः ॥ ३४ ॥

हस्तः करः शयः पाणिः पञ्चशाखश्च स स्मृतः ।
अङ्गुल्यः करशाखाः स्युस्तथाङ्गुष्ठाङ्गुलौ समौ ॥ ३५ ॥

कामाङ्कुशो महाराजः करजो नखरो नखः ।
करशूकः कररुहो भुजाकण्टः पुनर्भवः ॥ ३६ ॥

शिरोधिः कंधरा ग्रीवा धमनिश्च शिरोधरा ।
उरो हृद्धृदयं वक्षः स्तनान्तरभुजान्तरे ॥ ३७ ॥

स्तनौ कुचावुरोजौ च वक्षोजौ च पयोधरौ ।
उदरं जठरं तुन्दं पिचण्डः कुक्षिरेव च ॥ ३८ ॥

त्रिवलिस्तूदरे रेखा नाभिः स्यात्तुन्दकूपिका ।
अङ्कस्तु क्रोड उत्सङ्गः पृष्ठं वंशाग्निकं तथा ॥ ३९ ॥

मध्योऽवलग्नं विलग्नं मध्यमोऽलङ्क एव च ।
काञ्चीपदं कटिः श्रोणिः कटीरं च ककुद्मती ॥ ४० ॥

अधो नितम्ब आरोहः स्त्रीकट्या जघनं पुरः ।
उपस्थं च भगो योनिः स्त्रीचिह्नं स्मरमन्दिरम् ॥ ४१ ॥

पुंश्चिह्नं मेहनं मेढ्रं शिश्नं शेफ इति स्मृतम् ।
अपानं तु गुदं पायुरूरू सक्थि समे उभे ॥ ४२ ॥

---

33 D1 missing.
34 D1 missing.
35 D1 missing.
36 D1 missing.
37 D1 missing.
38 D1 missing.–c) B2 तुंद॰.
39 D1 missing.
41 —b) B1. 2 पुरं.
42 —d) B4 ऊरूः (in marg.)

जानूरुपर्व चाष्ठीवत्प्रतिजङ्घा तु पिण्डिका ।
पादः पदोऽङ्घ्रिश्चरणश्चलनः क्रमणः क्रमः ॥ ४३ ॥

मण्डनं स्यादलंकारो भूषणाभरणे अपि ।
शीर्षाभरणं शीर्षपुष्पं चूडामणिः शिरोमणिः ॥ ४४ ॥

मौलिः किरीटं कोटीरमुष्णीषं मुकुटं तथा ।
आपीडः शेखरोत्तंसावतंसाः शिरसः स्रजि ॥ ४५ ॥

ललामकं ललाटस्थं कर्णपूरं तु कर्णगम् ।
तिलकं तमालपत्रं चित्रं पुण्ड्रं विशेषकम् ॥ ४६ ॥

पत्रलेखा पत्रलता पत्रभङ्गी ललाटिका ।
ताडङ्कस्तु ताडपत्रं कुण्डलं कर्णवेष्टकम् ॥ ४७ ॥

नासानामग्रतः पुष्पमाभरणं च मौक्तिकम् ।
अञ्जनं कज्जलं चैव ताम्बूलं मुखरञ्जनम् ॥ ४८ ॥

ग्रैवेयं कण्ठाभरणं कण्ठसूत्रं च कण्ठिका ।
हारो मुक्तावली मुक्तामाला मुक्ताकलापकम् ॥ ४९ ॥

हारमध्यमणिः प्रोक्तो नायकस्तरलोऽपि च ।
केयूरमङ्गदं बाहुरक्षकं करभूषणम् ॥ ५० ॥

मुद्रिका ऊर्मिका मुद्राभिज्ञानं चाङ्गुलीयकम् ।
कटको वलयावापौ कङ्कणं करभूषणम् ॥ ५१ ॥

रसना मेखला काञ्ची कलापश्चापि सप्तकी ।
कटिसूत्रं सारसनं किङ्किणी क्षुद्रघण्टिका ॥ ५२ ॥

मञ्जीरं पादकटकं तुलाकोटिश्च नुपुरम् ।
हंसकं सिञ्जिनी चेति यावकोऽलक्तकः स्मृतः ॥ ५३ ॥

---

45 —a) B1 कोटीरः

49 —a) B1 कण्ठाभरणे; –d) B1 om. माला मुक्ता.

51 —a) B1 transp मुद्रिका and ऊर्मिका; B2 om. cd.

52 B3 om. –a) B1 कांचिः.

माला स्रग्दाम माल्यं च स्नानं मज्जनमाप्लवः ।
चार्चिक्यं समालम्भनमङ्गरागो विलेपनम् ॥ ५४ ॥

अंशुकं वसनं वस्त्रं वासश्चीवरमम्बरम् ।
पटश्च सिचयश्चेलं वस्त्रस्यान्तोऽञ्चलः स्मृतः ॥ ५५ ॥

क्षौमं दुकूलं दुगुलं पट्टकूलं पटोत्तमम् ।
वेषो नेपथ्यमाकल्पमुष्णीषो मूर्धवेष्टनम् ॥ ५६ ॥

प्रावार उत्तरासङ्गो वैकक्षं बृहतिकापि च ।
परिधानं वेष्टनकं कच्छा तत्पश्चिमाञ्चलम् ॥ ५७ ॥

कक्षापटस्तु कौपीनं नक्तकः कर्पटोऽपि च ।
प्रच्छादनं प्रावरणं संव्यानं चोत्तरीयकम् ॥ ५८ ॥

कूर्पासः कञ्चुकश्चैव चोलः कञ्चुलिकाङ्गिका ।
चण्डातकं चलनकं साटी चोटी च साटिका ॥ ५९ ॥

अन्तरीयं निवसनं परिधानमधोंशुकम् ।
नीवी तद्बन्धनं ग्रन्थिः प्रालम्बं झुम्बणं समे ॥ ६० ॥

चूर्णानि वासयोगाः स्युः पिष्टातः पटवासकः ।
वस्त्रादेर्यस्तु गन्धाद्यैः संस्कारः सोऽधिवासनम् ॥ ६१ ॥

आमोदश्च परिमलो गन्धो वासो विमर्दजः ।
इष्टगन्धः सुगन्धिः स्यात्सुरभिर्घ्राणतर्पणः ॥ ६२ ॥

कुङ्कुमं घुसृणं वर्ण्यं रक्तं काश्मीरजन्म च ।
श्रीखण्डो मलयजश्च गोशीर्षं चन्दनं स्मृतम् ॥ ६३ ॥

कर्पूरो घनसारश्च चन्द्राख्यो हिमवालुका ।
कस्तूरिका मृगमदो मृगनाभिर्मृगाण्डकः ॥ ६४ ॥

---

56 —c) B2 आकल्पः.
57 —d) B1 कक्षा for कच्छा. B3 om. 57cd.
58 B3 om. 58 ab. –c) B4 प्राच्छादनं.
59 —a) B1 कन्चुकं.
62 —c) B1 इष्टगंधिः. B3 om. सुगन्धिः स्यात्... ...तर्पणः
63 B3 om. कुंकुमं... ...श्रीखण्डो.

कस्तूरी गन्धधूली च मदना मृगनाभिजा ।
कृष्णागरुः काकतुण्डो राजार्हं वंशिकागरुः ॥ ६५ ॥
चोचाह्वयं तस्य सत्त्वं तद्रूपो देववल्लभः ।
परिकर्माङ्गसंस्कारो मण्डनं च प्रसाधनम् ॥ ६६ ॥
दर्पणो मुकुरादर्शौ व्यजनं तालवृन्तकम् ।
शोभा कान्तिर्विभूषा श्रीर्लक्ष्मीश्छाया द्युतिश्छविः ।
राढाभिख्या च लावण्यं सुषमा विभ्रमोऽपि च ॥ ६७ ॥

॥ इत्यङ्गवर्गः ॥

मन्दिरं सदनं सद्म निलयो भवनं गृहम् ।
ओको निवास आवासो धिष्ण्यं धाम निकेतनम् ॥ ६८ ॥
आगारं वेश्म वसतिर्निशान्तं शरणं क्षयः ।
प्रासाद आलयः सौधं हर्म्यं गेहं कुटाश्रयौ ॥ ६९ ॥
गर्भागारोऽपवरको मण्डपो जनताश्रयः ।
भाण्डागारः कोशकोषावङ्गण्यं[णं] चत्वराजिरे ॥ ७० ॥
अट्टमट्टालकं क्षौमं गृहस्योपरिभूमिका ।
चित्रशाला चतुर्द्वारं चन्द्रशाला शिरोगृहम् ॥ ७१ ॥
शय्यागृहं वासगृहं क्रीडासद्म रतास्पदम् ।
वातायनं गवाक्षश्च जालको लघुमण्डपः ॥ ७२ ॥
दीपो गृहमणिर्ज्योतिः प्रदीपः कज्जलध्वजः ।
आसनं विष्टरः पीठं भद्रासनं तदुत्तमम् ॥ ७३ ॥
खट्वा पर्यङ्कपल्यङ्काष्टशल्यामञ्चमञ्चकाः ।
शय्या च शयनं तल्पं शयनीयं च तूलिका ॥ ७४ ॥

---

68 —c) B1 आवारौ for आवासो.
69 —a) B1 अंगारं. –b) B1 क्षयं.
73 —c) B2 विष्टरं.
74 —d) B1 शयनीय for शयनं.

उच्छीर्षकमुपधानमुपबर्हं च गिन्दुकम् ।
चन्द्रोदयो वितानं चोल्लोचः कदक इत्यपि ॥ ७५ ॥

आलिङ्गनं परिष्वङ्गः संश्लेष उपगूहनम् ।
अङ्कपाली परिरम्भो मेलकः सङ्गसंगमौ ॥ ७६ ॥

मैथुनं कामकेलिश्च संभोगः सुरतं रतम् ।
रहोरतिर्निधुवनं ग्राम्यधर्मश्च मोहनम् ॥ ७७ ॥

क्रीडा लीला विलासश्च केलिर्नर्म रतिर्द्रवः ।
स्नेहः प्रीतिः प्रेमरागौ मैत्री सख्यं च सौहृदम् ॥ ७८ ॥

लज्जा व्रीडा त्रपा ह्रीश्च मन्दाक्षं स्यादपत्रपा ।
हासस्तु हासिका हास्यं हसनं हसितं स्मितम् ॥ ७९ ॥

हर्षः प्रमोद आनन्दो ह्लादो मुन्मोदसंमदाः ।
हावः सुखविकारः स्याद्भावश्चित्तसमुद्भवः ॥ ८० ॥

विलासः सहजो ज्ञेयो विभ्रमो भ्रूसमुद्भवः ।
तुष्टिः प्रीती रतिः स्वास्थ्यं संतोषो निर्वृतिर्धृतिः ॥ ८१ ॥

शान्तं सौख्यं सुखं शर्म शंसा वा शुभवेदनम् ।
विधिश्च नियतिर्दिष्टं दैवं भाग्यं शुभ त्वयः ॥ ८२ ॥

दयानुकम्पा करुणानुक्रोशश्च कृपा घृणा ।
प्रसन्नता प्रसत्तिश्च प्रसादोऽनुग्रहो हितम् ॥ ८३ ॥

भावो मतमभिप्रायश्छन्द आकूत आशयः ।
शीलं स्वभावः सहजो निसर्गः प्रकृती रुचिः ॥ ८४ ॥

आश्चर्यमद्भुतं चित्रं विस्मयश्चोद्यमित्यपि ।
कौतूहलं च कुतुकं कौतुकं च कुतूहलम् ॥ ८५ ॥

लोभस्तृष्णा स्पृहा लिप्सा काङ्क्षा सेहा च लालसा ।
कामस्तर्षोऽभिलाषस्तृडिच्छा वाञ्छा मनोरथः ॥ ८६ ॥

—a) B1 उपधानः
—c) B1 प्रेमरागो.

गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः ।
हठो मदः स्मयो दर्प औद्धत्यमवलिप्तता ॥ ८७ ॥

कोपः क्रोधोऽमर्षरोषौ प्रतिघो मन्युरुट्क्रुधः ।
ईर्ष्यासूयाभिषङ्गश्च संरम्भोऽक्षान्तिरक्षमा ॥ ८८ ॥

कैतवं कपटं दम्भः कूट छद्मोपधिश्छलम् ।
व्यपदेशो मिषं व्याजं निभं लक्ष्यं छलं च तत् ॥ ८९ ॥

माया तु शठना शाठ्यं वञ्चनं विप्रतारणम् ।
शङ्कातङ्कौ दरस्त्रासो भीतिर्भीः साध्वसं भयम् ॥ ९० ॥

निद्रा तन्द्रा प्रमीला च स्वापः संवेशसंलयौ ।
उपांशुश्छन्नमेकान्तं विविक्तं विजनं रहः ॥ ९१ ॥

प्रस्तावोऽवसरो वेला वारश्च समयः क्षणः ।
आगोऽपराधो मन्तुश्च व्यलीकं विप्रियाहिते ॥ ९२ ॥

विप्रलम्भो विप्रयोगो वियोगो विरहः स्मृतः ।
रोदनं रुदितं क्रन्दो विलापः परिदेवनम् ॥ ९३ ॥

बाष्पो श्रमांशु (?) नेत्राम्बु घर्मः स्वेदः श्रमाम्बु च ।
पुलकः कण्टको रोमहर्षो रोमाञ्च इत्यपि ॥ ९४ ॥

उत्कण्ठोत्कलिकौत्सुक्यं हृल्लेखारलकारती (?) ।
मौनं चाजल्पनं तूष्णी[ष्णीं?] चिन्तनं स्मरणं स्मृतिः ॥९५॥

शोकः शुक् शोचनं खेदः पश्चात्तापोऽप्यनिर्वृतिः ।
विषाद आधिरुद्वेगश्चिन्ता कम्पश्च वेपथुः ॥ ९६ ॥

---

88 —b) B2 प्रतिघौ.
90 —d) B3 वीतिः for भीतिः
92 —b) B3 क्षयः for क्षणः
93 —c) B2 रुदनं for रुदितं.
94 —d) B1 रोमः हर्षो for रोमहर्षो.
96 B1 missing अधिरुद्वेग......वेपथुः.

दुःखं कष्टं व्यथा पीडा वेदना यातनासुखम् ।
कृच्छ्रं बाधार्तिराभीलं विधुरं व्यसनं विपत् ॥ ९७ ॥

प्रयासायासव्यायामा ग्लानिः खेदः क्लमः श्रमः ।
व्यर्थं वृथा मुधा मोघं निःफलं च निरर्थकम् ॥ ९८ ॥

शाप आक्रोश आक्षेपो भर्त्सनं तर्जनं च धिक् ।
परिभाषणमुपालम्भः शपथः शपनं शपः ॥ ९९ ॥

अवधिः पूर्णता सीमा मर्यादा धारणा स्थितिः ।
वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः किंवदन्त्यपि ॥ १०० ॥

संदेशो वाचिकं वाच्यं लेखः पत्रं च पत्रिका ।
प्रसादनमनुनयः सान्त्वनं चटु चाटु च ॥ १०१ ॥

व्याहारो भाषितं चोक्तिर्वाग्वाक्यं वचनं स्मृतम् ।
प्रश्नः पृच्छानुयोगश्च प्रतिवाक्यं तदुत्तरम ॥ १०२ ॥

॥ इति संयोगादिवर्गः ॥

गीतं नृत्यं च वादित्रं त्रयं संगीतमुच्यते ।
गीतं गानं गेयं गीतिर्नादो गन्धर्व एव च ॥ १०३ ॥

नर्तनं नाटकं नृत्यं लास्य नाट्यं च ताण्डवम् ।
अङ्गहारोऽङ्गविक्षेपो व्यञ्जकोऽभिनयो लयः ॥ १०४ ॥

षड्जर्षभगान्धारा मध्यमः पञ्चमस्तथा ।
धैवतो निषधः सप्त स्वरास्तन्त्र्यादिषूद्भवाः ॥ १०५ ॥

---

97 B1 missing.
98 B1 missing. –a) B2 °व्यायाम.
99 B1 missing.
100 B1 missing. B3 om. d.
101 B1 missing. B3 om. –ab) B2 corrupt.
102 B1 missing. –a) B3 व्यवहारो for व्याहारो.
Colophon: B3.4 संभोगादि, B1 colophon missing.
103 B1 missing.
104 B1 missing. –a) B2 नाटिका नृत्त fot नाटकं नृत्यं.
105 B1 missing. –a) B2 °गंधारा for °गान्धारा.

द्रुतं विलम्बितं मध्यमिति गीते त्रयो लयाः ।
ग्रामा घोरमन्द्रतारास्तालाश्च चपुटादयः ॥ १०६ ॥

सप्त स्वरास्त्रयो ग्रामा मूर्छनाश्चैकविंशतिः ।
ताना एकोनपञ्चाशत्तालाः स्युर्द्विचतुर्मिताः ॥ १०७ ॥

वाद्यं वादित्रमातोद्यं तूर्यं तूरः स्मरध्वजः ।
ततं वीणाप्रभृतिकं वंशतालादिकं घनम् ॥ १०८ ॥

वंशादिकं तु सुषिरमानद्धं मुरजादिकम् ।
विपञ्ची वल्लकी वीणा मुरलीवंशवेणवः ॥ १०९ ॥

मृदङ्गो मुरजश्चैव मर्दलः पुष्करस्त्रिधा ।
स्याद्यशःपटहो ढक्का भेरी दुन्दुभिरानकः ।
वाद्यभेदाः शङ्खताला झल्लरीपटहादयः ॥ ११० ॥

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्चेत्येते नव रसाः स्मृताः ॥ १११ ॥

मभजासानयरता गणा अष्ट लघुर्गुरु ।
एकं द्विचतुःषट्स्वरैर्द्रुतो लघुर्गुरुः प्लुतः ॥ ११२ ॥

न स्यात्पञ्चस्वरान्नूनं पञ्चभिः षा[ओ]डवं स्मृतम् ।
षट्स्वरैः षाडवं प्रोक्तं सम्पूरणं तु सप्तभिः ॥ ११३ ॥

॥ इति श्रीसंगीतवर्गः ॥

---

106 B1 missing.
107 B1 missing.
108 B1 missing.–a) B2 वाद्दं for वाद्यं.
109 B1 missing.
110 B1 missing.
111 B1 missing.–a) B2 करुणा for करुण.
112 B1 missing.
113 B1 missing.–d) B4 संपूर्ण.

पण्डितः कोविदः प्राज्ञो धीमान्विद्वान्बुधः सुधीः ।
कृती मनीषी मेधावी कविः सूरिर्विशारदः ॥ ११४ ॥

कृष्टिर्विपश्चित्संख्यावान्दोषज्ञो ज्ञो विचक्षणः ।
प्रवीणश्चतुरो विज्ञो विदग्धः कुशलः पटुः ॥ ११५ ॥

निष्णातो निपुणो दक्षो लब्धलक्षः सुशिक्षितः ।
छेको नागरिकः सुज्ञो वाग्मी व्युत्पन्न एव च ॥ ११६ ॥

मूर्खो मन्दो जडो मूढो बालोऽज्ञो जाल्मबालिशौ ।
शठः कुण्ठश्च बठरो निर्बुद्धिश्च निरक्षरः ॥ ११७ ॥

उपाध्यायोऽध्यापकश्चोपदेष्टा पाठको गुरुः ।
आचार्यः शिक्षकः शास्तानूचानः साङ्गशास्त्रवित् ॥ ११८ ॥

शिष्यश्छात्रो विनेयोऽन्तेवासी शैक्षश्च दीक्षितः ।
आस्तिकः श्रावकः श्राद्धः स्याच्छ्रद्धालुरुपासकः ॥ ११९ ॥

यतिर्यती मुनिः साधुस्तपस्वी संयतो व्रती ।
भिक्षुर्मुमुक्षुर्निर्ग्रन्थः ऋषिर्योगी च संयमी ॥ १२० ॥

नतिः प्रणामः प्रणतिर्नमस्कारोऽभिवादनम् ।
वन्दनं प्रणिपातश्च नमस्या च नमस्क्रिया ॥ १२१ ॥

भक्तिः सेवा च सु[शु]श्रूषा परिचर्या प्रसादना ।
वरिवस्याराधनोपास्तिर्विनयः समुपासनम् ॥ १२२ ॥

पूजार्हणा सपर्यार्चोपहारोऽपचितिर्बलिः ।
सन्मानादरसत्कारा अभ्युत्थानं च गौरवम् ॥ १२३ ॥

---

114 B1 missing.–b) B2 बुद्ध· for बुध.
115 B1 missing.
116 B1 missing.–c) B4 स्त(सु in marg.)ज्ञो.
117 B1 missing.
118 B1 missing.–c) All mss. शिष्यकः for शिक्षक·.
119 B1 missing.
120 B1 missing up to मुमुक्षुः.

उपग्राह्यं ढौकनिका प्राभृतोपायनोपदाः ।
आज्ञा नियोग आदेशो निर्देशः शासनं वचः ॥ १२४ ॥

वाचा संधा प्रतिज्ञागूः संगरः संविदाश्रवः ।
आम्नायः संप्रदायश्च गुरुक्रमः परंपरा ॥ १२५ ॥

प्रशंसा वर्णना श्लाघा स्तवः स्तोत्रं स्तुतिर्नुतिः ।
कीर्तिः श्लोको यशो वर्णः साधुवादः समाज्ञया ॥ १२६ ॥

उपक्रोशोऽवर्णवादः कौलीनं वचनीयता ।
जुगुप्सा गर्हणा निन्दा निर्वादश्चापवादवत् ॥ १२७ ॥

अनादरः परिभवो रीढावज्ञा निरस्क्रिया ।
अवहेलावगणना तक्षणं चापमानता ॥ १२८ ॥

अभिधानं नामधेयं नामाख्या आह्वयोऽभिधा ।
गोत्रं संज्ञा च संबुद्धिर्हूतिराकरणं हवः ॥ १२९ ॥

अर्दना प्रार्थना याच्ञा दानं त्यागो विसर्जनम् ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ १३० ॥

याचकस्तर्कुको ग्राही मार्गणोऽर्थी वनीपकः ।
धर्मः पुण्यं वृषः श्रेयः सुकृतं शुभकर्म च ॥ १३१ ॥

किल्बिषं कल्मषं पापमेनः पाप्मा च पातकम् ।
दुरितं वृजिनं पङ्कमघमंहश्च दुःकृतम् ॥ १३२ ॥

असत्यं वितथं कूटं मिथ्यालीकं मृषानृतम् ।
सत्यं तथ्यमृतं सम्यक् सूनृतं च यथास्थितम् ॥ १३३ ॥

विधिः कल्पाचारमार्गा वृत्तं शीलं स्वभाववत् ।
क्षान्तिः क्षमा तितिक्षा च तपस्या नियमस्तपः ॥ १३४ ॥

---

124 —d) B1 शमनं for शासनं.

132 —c) B2 वृजनं for वृजिनं.

134 —b) B1 सुभाव° for स्वभाव°.

उपवासश्चोपवस्तं व्रतं नियमपालनम् ।
समाधिर्धारणा ध्यानं प्रणिधानं च चिन्तनम् ॥ १३५ ॥

बुद्धिर्मेधा मतिः प्रज्ञा धिषणा धीश्च शेमुषी ।
मनीषा प्रतिभा ज्ञप्तिः प्रेक्षा पण्डा च चेतना ॥ १३६ ॥

चित्संविज्ञानसंवित्तिर्भगबोधोपलब्धयः ।
तत्त्वं रहस्यं सारश्च परमार्थश्च निश्चयः ॥ १३७ ॥

सिद्धान्तागमराद्धान्तकृतान्ताः प्रोक्तयः श्रुतम् ।
समयः प्रवचनं सूत्रं ग्रन्थः शास्त्रं च पुस्तकम् ॥ १३८ ॥

स्वाध्यायः पठनं पाठोऽधीतिरध्ययनं पठः ।
जाप्यं जापो जपो मन्त्रे मानसे वचनेऽपि च ॥ १३९ ॥

शब्दो नादो ध्वनिर्ध्वानं निर्घोषो निस्वनः स्वनः ।
निर्ह्राद आरवो रावो निनादो निनदोऽपि च ॥ १४० ॥

प्रतिनादः प्रतिशब्दः प्रतिध्वानं प्रतिश्रुतिः ।
निदानं कारणं हेतुः कृत्यमर्थः प्रयोजनम् ॥ १४१ ॥

दैवज्ञो गणको ज्ञानी मौहूर्तिको निमित्तवित् ।
सांवत्सरो ज्योतिषिको ज्योतिर्वित्प्रश्नविच्च सः ॥ १४२ ॥

चिकित्सिको भिषग्वैद्योऽगदंकारश्च रोगहृत् ।
चिकित्सितज्ञो दोषज्ञ आयुर्वेदस्तु वैद्यकः ॥ १४३ ॥

ऋग्वेदश्च यजुर्वेदः सामवेदोऽप्यथर्वणः ।
शिक्षा कल्पो व्याकरणं छन्दोज्योतिर्निरुक्तयः ॥ १४४ ॥

षडङ्गा वेदाश्चत्वारो मीमांसान्विक्षिकी तथा ।
धर्मशास्त्रं पुराणं च विद्या एताश्चतुर्दश ॥ १४५ ॥

---

137 —a) B2 धि for चित्.
141 —b) B2 प्रतिधानं for प्रतिध्वानं.–d) B2 अर्थं for अर्थः.
142 —b) B2 मुहूर्त्तकः.–c) B2 संवत्सरः for सांवत्सरः.
143 —d) B2 वैद्यकं for वैद्यकः.
144 —c) All mss. शिष्या for शिक्षा.
145 —b) All mss. आन्विषिकी for आन्विक्षिकी.

देवालयो देवगृहं चैत्यमायतनं मठः ।
बिम्बं मूर्तिः प्रतिमार्चा महः पर्व महोत्सवः ॥ १४६ ॥

जैना मीमांसका बौद्धाः शैवा वैशेषिका अपि ।
नैयायिकाश्च मुख्यानि दर्शनानीह सन्ति षट् ॥ १४७ ॥

मोक्षोऽपवर्गो निर्वाणं मुक्तिर्निःश्रेयसं शिवः ।
महोदयोऽमृतं सिद्धिः कैवल्यमपुनर्भवः ॥ १४८ ॥

कुशलं मङ्गलं भद्रं कल्याणं भावुकं शुभम् ।
क्षेमं भव्यं शिवं श्रेयः शस्तं श्वःश्रेयसं स्मृतम् ॥ १४९ ॥

स्वागतं स्वस्तिमेदं च स्वास्थ्यं वार्तमनामयम् ।
सदा ददातु सानन्दं चिदानन्दो जगत्प्रभुः ॥ १५० ॥

॥ इति पण्डितवर्गः ॥

इति श्रीहर्षकीर्त्युपाध्यायविरचितायां शारदीयाभिधायां लघुनाममालायां द्वितीयः काण्डः ॥ २ ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णचतुष्टयम् ।
ब्रह्मचारी गृही वानप्रस्थो भिक्षुरिहाश्रमाः ॥ १ ॥

ब्रह्मचारी तु वर्णी स्याद्गृहस्थः स्नातको गृही ।
वैखानसो वानप्रस्थो भिक्षुः सांन्यासिको यतिः ॥ २ ॥

परिव्राट् परिरक्षी च परिव्राजकतापसौ ।
पाराशरी मस्करी च पाषण्डाः सर्वलिङ्गिनः ॥ ३ ॥

द्विजातिर्ब्राह्मणो विप्रो भूदेवो वाडवो द्विजः ।
अग्रजन्मा द्विजन्मा च षट्कर्मा मुखसंभवः ॥ ४ ॥

---

149 —b) B1.2 भावकं for भावुकं.
150 After st. 150 B4 adds:—
अंगसम्भोगसंगीतपण्डिताद्यैः सुसंस्कृतैः ।
वर्गैर्द्वितीयकाण्डोऽयं विदधे हर्षकीर्तिना ॥
2 —d) B2 संन्यासिको यती for सांन्यासिको यतिः,
3 —d) B2 पाषण्डी for पाषण्डाः,

यज्ञो याग: क्रतुः सत्रं सप्ततन्तुर्मखोऽध्वरः ।
होमो होत्रं वषट्कारो हवनं देवतर्पणम् ॥ ५ ॥

अजिनं चर्म कृत्तिस्त्वक्चीरं वल्कं च वल्कलम् ।
त्रितर्दिर्वेदिका वेदी गुहा स्यात्कन्दरा दरी ॥ ६ ॥

॥ इति ब्रह्मवर्गः ॥

क्षत्रियो बाहुजः क्षत्रं राजन्यो राजवंशजः ।
राजा राट् पार्थिवः क्ष्माभृन्महीक्षिन्नृपतिर्नृपः ॥ ७ ॥

प्रजापतिः क्षितिपतिर्नरदेवो नराधिपः ।
भूपः क्षितीशो भूपालः क्षोणीनाथो नरेश्वरः ॥ ८ ॥

नरेन्द्रो भूपतिर्भूभुक् सम्राट् तु शास्ति यो नृपः ।
चक्रवर्ती सार्वभौमः सर्वदेशाधिपो हि यः ॥ ९ ॥

नाथः प्रभुः पतिः स्वामी विभुः परिबृढोऽधिपः ।
ईश्वरो नायको नेता भर्तेन्द्र इन ईशिता ॥ १० ॥

राजचिह्नं त्वातपत्रं छत्रमातपवारणम् ।
चामरं वालव्यजनं सिंहासनं नृपासनम् ॥ ११ ॥

सभा समज्या परिषत्संसच्च समितिः सदः ।
गोष्ठ्यास्थानी समाजश्च पर्षत्सभ्याः समाजिकाः ॥ १२ ॥

अन्तःपुरं च शुद्धान्तोऽवरोधो नृप[ति?]स्त्रियः ।
महिषी पट्टराज्ञी स्यात्सौविदल्लश्च कञ्चुकी ॥ १३ ॥

परिवारः परिकरः परिबर्हः परिच्छदः ।
प्रतिहारो द्वारपालो दौवारिकश्च वेत्रभृत् ॥ १४ ॥

---

5 —b) B2 अध्वरं.

10 —d) B1 भर्ता च for भर्तेन्द्र. B2 ईप्सिता for ईशिता.

11 —d) B2 सिंहासनं तु.

13 —a) B2 शुद्धान्तं.

अवसर्पः स्पशश्चारो हेरिकः प्रण(णि)धिश्चरः ।
संदेशहारको दूतः पान्थस्तु पथिकोऽध्वगः ॥ १५ ॥

सेवकः किंकरो भृत्योऽनुजीव्यनुचरोऽनुगः ।
दासः प्रेक्षो भृतकश्च चेटः कर्मकरोऽपि च ॥ १६ ॥

पत्तिः पदातिः पदगः पुरोगामी पदातिकः ।
भटा योधाश्च योद्धारः सैन्याश्च सैनिका अपि ॥ १७ ॥

शूरो वीरश्चारभटो विक्रान्तः सुभटो बली ।
कातरो भीरुको भीरुः कांदिशीको भयद्रुतः ॥ १८ ॥

पराक्रमः पौरुषं च बलं शौर्यं च विक्रमम् ।
ओजः प्राणस्तरः स्थाम शक्तिर्वीर्यं तथोर्जवत् ॥ १९ ॥

अरिर्वैरी रिपुः शत्रुर्विपक्षो द्विट् द्विषत्परः ।
प्रत्यर्थी प्रत्यवस्थाता सपत्नः शात्रवोऽहितः ॥ २० ॥

परिपन्थी प्रत्यनीको दस्युदुर्हृदरातयः ।
अनीकं कटकं सैन्यं चक्रं दण्डो बलं चमूः ॥ २१ ॥

वाहिनी ध्वजिनी सेना पृतना च वरूथिनी ।
अनीकिन्यक्षौहिणी च स्कन्धावारः पताकिनी ।
हस्त्यश्वरथपद्भिश्च चतुरङ्गं बलं स्मृतम् ॥ २२ ॥

स्यात्सेनाक्षौहिणी नाम खागाष्टैकद्विकै(२१८७०)र्गजैः ।
रथैश्चेभ्यो हयैस्त्रिघ्नैः(६५६१०) पञ्चघ्नैश्च(१०९३५०) पदातिभिः ॥२३॥

आधोरणो हस्तिपको माहामात्रो निषाद्यपि ।
यन्ता सादी त्वश्ववारो नियन्ता सूतसारथी ॥ २४ ॥

संनाहः कवचं दंशस्तनुत्रं वर्म कङ्कटः ।
सारसनं त्वधिकाङ्गं वारवाणस्तु कञ्चुकः ॥ २५ ॥

---

17 —c) B2 भटो.–d) B2 सेवका for सैनिका.

21 —d) B3 चक्रदण्डो.

25 —b) B2 कंटकं for कङ्कटः. –b) B2 कंचुकं.

शिरस्त्राणं तु शीर्षण्यं जालिका त्वङ्गरक्षिका ।
शस्त्रमायुधमस्त्रं च हेतिः प्रहरणं स्मृतम् ॥ २६ ॥

धनुः कोदण्डमिष्वासश्चापो धन्व शरासनम् ।
कार्मुकं जीवा प्रत्यञ्चा ज्यामौर्वीसिञ्जिनीगुणाः ॥ २७ ॥

निषङ्गस्तूणतूणीरावुपासङ्गस्तथेषुधिः ।
इषुर्बाणः शरः पत्री काण्डो विशिख आशुगः ॥ २८ ॥

पृषत्कः सायको रोपः कङ्कपत्रः शिलीमुखः ।
कलम्बाजिह्मगखगा नाराचश्च क्षुरप्रवत् ॥ २९ ॥

खेटकः पलकं चर्म शस्त्रिका तु कृपाणिका ।
असिधेनुरसिपुत्री छुरिका क्षुरिका च सा ॥ ३० ॥

करवालासिनिस्त्रिंशकृपाणतरवारयः ।
मण्डलाग्रश्चन्द्रहासः खड्गकौक्षेयरिष्टयः ॥ ३१ ॥

कुन्तः प्रासस्तथा भल्लो द्रुघणो मुद्गरो घनः ।
कुठारः परशुः पर्शुः सुधितिश्च परश्वधः ॥ ३२ ॥

संग्रामः समरं युद्धं प्रधनं संयुगं रणम् ।
जन्यमायोधनं संख्यमाहवः संपरायकम् ॥ ३३ ॥

संयत्समितिराजिर्युध् द्वंद्वमास्कन्दनं मृधम् ।
राटिः समीकं संस्फोटो विग्रहः कलहः कलिः ॥ ३४ ॥

वैतालिका बोधकरा बन्दिनः स्तुतिपाठकाः ।
देशो जनपदो राष्ट्रं नीवृद्विषयमण्डले ॥ ३५ ॥

पूः पुरं नगरं द्रङ्गो निवेशो नगरी पुरी ।
स्थानीयं निगमो ग्रामः पत्तनं पुटभेदनम् ॥ ३६ ॥

वप्रः शालः कोट्टदुर्गौ प्राकारो वरणश्चयः ।
प्रतोली विशिखा रथ्या पुरद्वारं च गोपुरम् ॥ ३७ ॥

---

34 —b) B2 स्मृतं for मृधं.

तुरुष्का यवना म्लेच्छाः पारसीकाः शकास्तथा ।
प्रष्ठाना मुद्गलाश्चैव स साहिस्तेषु योऽधिपः ॥ ३८ ॥

सीतापतिर्दाशरथिः काकुत्स्थो भरताग्रजः ।
रघुनाथो रामचन्द्रः स्यात्सौमित्रिस्तु लक्ष्मणः ॥ ३९ ॥

वैदेही मैथिली सीता जानकी पृथिवीसुता ।
पौलस्त्यो रावणो रक्षो लङ्केशो दशकन्धरः ॥ ४० ॥

धर्मात्मजोऽजातशत्रुः शल्यारिश्च युधिष्ठिरः ।
भीमोऽरिर्बककीचकयोर्वायुपुत्रो वृकोदरः ॥ ४१ ॥

धनंजयोऽर्जुनः पार्थ इन्द्रपुत्रः कपिध्वजः ।
श्वेताश्वः फाल्गुनो जिष्णुः सव्यसाची च कर्णजित् ॥ ४२ ॥

प(पा)ञ्चाली द्रौपदी कृष्णा याज्ञसेनी च वेदिजा ।
हनूमानञ्जनीपुत्रो मारुतिर्वज्रकङ्कटः ॥ ४३ ॥

॥ इति राजवर्गः ॥

वैदेहिकश्चापणिको नैगमो वाणिजो वणिक् ।
पण्याजीवः सार्थवाहः क्रयविक्रयिकः क्रयी ॥ ४४ ॥

आपणो विपणिर्हट्टस्तन्मार्गे स्याच्चतुष्पथः ।
धान्यं शस्यं च तद्भेदा मुद्गगोधूमतन्दुलाः ॥ ४५ ॥

अमत्रं भाजनं पात्रं पण्यं भाण्डं क्रयाणकम् ।
वर्तनं जीवनं वृत्तिराजीवो जीविकापि च ॥ ४६ ॥

---

38 B3 missing cd.
39 B3 missing. -d) B2 सौमित्रः for सौमित्रिः.
40 B3 missing.
41 B3 missing.
42 B3 missing.
43 B3 missing.
44 B3 missing. -d) B2 विक्रयकः.
45 B3 missing. -b) B2 मार्गो for मार्गे; B4 चतुष्पथं.
46 B3 missing.

मूलद्रव्यं परिपणो नीवी लाभोऽधिकं फलम् ।
सत्यापनं सत्यंकारो मूल्यवस्त्वर्थवक्रयाः ॥ ४७ ॥

संपत्तिः श्रीर्विभूतिश्च लक्ष्मीसंपत्समृद्धयः ।
श्रीमान्समृद्धो लक्ष्मीवानिभ्य आढ्यो धनेश्वरः ॥ ४८ ॥

आपद्विप[द्विप]त्तिश्च दारिद्रं निःस्वनिर्धनौ ।
कदर्यः कृपणो लोभी बद्धमुष्टिर्मितंपचः ॥ ४९ ॥

गोकुलं तु व्रजो घोषो गोष्ठं गोपास्तु बल्लवाः ।
दुग्धं पयोऽमृतं क्षीरं गोरसः क्षीरजं दधि ॥ ५० ॥

घृतमाज्यं हविः सर्पिः नवनीतं तु म्रक्षणम् ।
उदश्विन्मथितं तक्रमारनालं तु काञ्जिकम् ॥ ५१ ॥

हविष्यान्नं तु क्षैरेयी परमान्नं च पायसम् ।
घृतपक्वं तु पक्वान्नं घृतपूरादिभेदवत् ॥ ५२ ॥

सूपः स्यात्प्रहितं सूदोऽन्धः कूरं भक्तमोदनम् ।
व्यञ्जनं तेमनं शाकः पूपः पूपा च पोलिका ॥ ५३ ॥

भोजनं जेमनाहारौ भक्षणं खादनाशने ।
पिपासा तृट् तृषोदन्या बुभुक्षा क्षुत्क्षुधा रुचिः ॥ ५४ ॥

खण्डस्तु मधुधूलिः स्यान्मत्स्यण्डी फाणितं वरा ।
सितोपला शर्करा च सिताथेक्षुरसो गुडः ॥ ५५ ॥

---

47 B3 missing.
48 B3 missing —a) B2 संपत् for संपत्तिः.
49 B3 missing. —a) B2 दरिद्रः for दारिद्रं.
50 B4 missing घोषो...... ..दधि.
51 B4 missing.
52 B4 missing.
53 B4 missing.
54 B4 missing.
55 B4 missing. After st. 55 B3 adds: पूजा लोकाः प्रकृतयो जनाः

क्षेत्री जीवश्च कृषिकृत्कर्षकश्च कृषीवलः ।
क्षेत्रं वप्रश्च केदारो हलः सीरश्च लाङ्गलम् ॥ ५६ ॥

कुम्भकारः कुलालश्च कुम्भस्तु कलशो घटः ।
स्वर्णकारः कलादश्च मालाकारस्तु मालिकः ॥ ५७ ॥

क्षुरमर्दी दिवाकीर्तिर्नापितोऽन्तावसाय्यपि ।
मुण्डनं भद्राकरणं वपनं परिवापनम् ॥ ५८ ॥

वर्धकिः स्थपतिस्तक्षा रथकारश्च काष्ठतक् ।
व्योकारो लोहकारश्च शस्त्रमार्जोऽसिधावकः ॥ ५९ ॥

रङ्गाजीवश्चित्रकारस्तन्तु[स्तुन्न]वायस्तु सौचिकः ।
निर्णेजकः स्याद्रजकस्तन्तुवायः कुविन्दकः ॥ ६० ॥

चाक्रिकस्तैलिकस्तैली शिल्पिकारूककारवः ।
कल्यपालः सुराजीवी शौण्डिको मण्डहारकः ॥ ६१ ॥

मदिरा वारुणी मद्यं सुरा कादम्बरी मधु ।
शुण्डा दालासवः सीधुर्माध्वीकं कापिशायनम् ॥ ६२ ॥

आमिषं पिशितं मांसं पलं क्रव्यं च जङ्गलम् ।
रुधिरं शोणितं रक्तमस्रं क्षतजमप्यसृक् ॥ ६३ ॥

द्यूतकारोऽक्षदेवी चाक्षधूर्तः कितवश्च सः ।
द्यूतं दुरोदरं चाक्षवती पणश्च कैतवम् ॥ ६४ ॥

पाशका देवना अक्षाः सारयोऽष्टपदं फलम् ।
स्तेनः पाटच्चरो दस्युश्चौरस्तस्करमोषकौ ॥ ६५ ॥

56 B4 missing.
57 B4 missing.
58 B4 missing.
59 B4 missing; –a) B2 तक्षो for तक्षा.
60 B4 missing.
61 B4 missing.
62 B4 missing. B2 missing 62 a
63 B4 missing. –b) B3 जांगलं for जङ्गलं.
64 B4 missing. B2 om. कितवश्च सः । द्यूतंदरो. —d) B3 पणश्च: for पणः,
65 B4 missing.

कैवर्तो धीवरो दासो वागुरिकस्तु जालिकः ।
लुब्धको मृगयुर्व्याधो मृगयाखेटकौ समौ ॥ ६६ ॥

जीवान्तकः शाकुनिको वैतंसिकस्तु सौनिकः ।
पादूकृच्चर्मकारश्चोपानत्पादूश्च पादुका ॥ ६७ ॥

चाण्डालस्तु दिवाकीर्तिर्निषादश्च जनंगमः ।
मातङ्गः श्वपचोऽस्पृश्योऽन्तेवासी प्लवबुक्कसौ ॥ ६८ ॥

इतरः प्राकृतो नीचः पामरश्च पृथग्जनः ।
पुलिन्दः शम्बरो भिल्लः किरातश्च वनेचरः ॥ ६९ ॥

॥ इति शूद्रवर्गः ॥

उत्पत्तिर्जन्म जननमुत्पादो जनिरुद्भवः ।
जीवितं चासवः प्राणाः श्वासश्च श्वसितं मरुत् ॥ ७० ॥

युवा वयःस्थस्तरुणस्तारुण्यं यौवनं वयः ।
जरीयान्स्थविरो वृद्धो वार्धक्यं विस्रसा जरा ॥ ७१ ॥

गुणवानुत्तमः श्रेष्ठो योग्यः पूज्यो महान्गुणी ।
श्रेयाञ्छिष्टः सदाचारः साधुसभ्यार्यसज्जनाः ॥ ७२ ॥

विख्यातः प्रथितो ज्ञातः प्रतीतो विश्रुतोऽपि च ।
दातोदारो वदान्यश्च त्राता गोप्ता च रक्षकः ॥ ७३ ॥

कर्णेजपश्च पिशुनो द्विजिह्वो दुर्जनः खलः ।
पापो धूर्तः शठः क्रूरः क्षुद्रो नीचोऽधमोऽनृजुः ॥ ७४ ॥

---

66 B4 missing. –b) B2 जालिका for जालिकः.
67 B4 missing. B2 missing a. –a) B1.3 जीवांतिकः for जीवान्तकः. —b) B शौनिकः for सौनिकः.
68 B4 missing. –a) B2 चंडालः. –c) B2 अस्पर्शः for अस्पृश्यः.
69 B4 missing. –c) B2 संबरः for शम्बरः.
70 B4 missing.
71 B4 missing.
72 B4 missing. –c) B1 श्रेष्ठः for शिष्टः.
73 B4 missing. –a) B2 ज्ञाते.
74 B4 missing –c) B2 transp. धूर्तः and शठः.

दृप्तोऽभिमानी गर्विष्ठो गर्वितः स्तब्ध उन्नतः ।
कलङ्को लाञ्छनं लक्ष्म चिह्नमङ्कश्च लक्षणम् ॥ ७५ ॥

वैरं विरोधो विद्वेषः शृङ्खलो निगडोऽन्दुकः ।
विघ्नोऽन्तरायः प्रत्यूहो रोगातङ्कगदामयाः ॥ ७६ ॥

पाषाणः प्रस्तरो ग्रावा दृषदश्मोपलः शिला ।
रेणुर्धूली रजः पांशुः पङ्कश्चिखिल्लकर्दमौ ॥ ७७ ॥

व्यवसायोद्यमोद्योगाभियोगोत्साहविक्रमाः ।
खुरली तु श्रमोऽभ्यासः संवाहनं तु मर्दनम् ॥ ७८ ॥

मिष्टं स्वादुश्च मधुरः कषायस्तुवरो रसः ।
पाचनोऽम्लो दन्तशठः कटुकः कटुरूषणः ॥ ७९ ॥

स्याल्लवणः सर्वरसः क्षारस्तिक्तं तु तीक्ष्णवत् ।
रक्तः शोणोऽरुणस्ताम्रो लोहितः पाटलोऽपि च ॥ ८० ॥

श्वेतः शुक्लः सितः शुभ्रो वलक्षो धवलः शुचिः ।
गौरोऽवदातो विशदः पाण्डुः पाण्डुर उज्ज्वलः ॥ ८१ ॥

पीतो गौरो हरिद्राभः पालाशो हरितो हरित् ।
कालः श्यामः सितिः कृष्णः श्यामलो मेचकोऽसितः ॥ ८२ ॥

नीलो रामोऽञ्जनाभश्च कर्बुराद्यास्तु मिश्रिताः ।
युग्मं द्वयं युगं द्वंद्वमुभयं युगलं द्वयी ॥ ८३ ॥

यमलं मिथुनं द्वैतं त्रयं च त्रितयं त्रयी ।
समूहो निवहो व्यूहो वृन्दं चक्रं कदम्बकम् ॥ ८४ ॥

---

75 B4 missing. –a) B2 दृप्तो for दृप्तो. –c) B2 लक्षं for लक्ष्म.
76 B4 missing.
77 B4 missing. –a) B2 प्रस्तारो for प्रस्तरो.
78 B4 missing.
79 B4 missing.
80 B4 missing. –c) B2 रक्तं.
81 B4 missing.
82 B4 missing. –b) B2 पलाशो.
83 B4 missing.
84 B4 missing.

ओघः संघो व्रजो व्रातो निकरः प्रकरश्चयः ।
संदोहः संहतिः स्तोमो वारः समुदयो गणः ॥ ८५ ॥

समुदायः समवायो निकुरम्बं च संचयः ।
जालः कलापः पटलः संघातः पूगमण्डलौ ॥ ८६ ॥

राशिः पुञ्जोत्करौ कूटं जातं यूथं भरः कुलम् ।
ग्रामो वर्गः समाहारो निकायो निचयोऽपि च ॥ ८७ ॥

राजिर्मालावलिः श्रेणिस्ततिः पङ्क्तिश्च धोरिणी ।
सर्वं समस्तं सकलं समग्रं निखिलाखिले ॥ ८८ ॥

विश्वं कृत्स्नं तथाशेषं खण्डेऽर्धं शकलं दलम् ।
स्तोकं तुच्छं दभ्रमल्पं मात्रा लेशः कणो लवः ॥ ८९ ॥

अणु सूक्ष्मं लघु श्लक्ष्णं क्षामः क्षीणः कृशस्तनु ।
बंहिष्ठं प्रचुरं प्राज्यं पुष्कलं बहुलं बहु ॥ ९० ॥

अदभ्रं भूरि भूयिष्ठं भूयश्च प्रबलोऽधिकः ।
खर्वं ह्रस्वं वामनं च प्रलम्बं दीर्घमायतम् ॥ ९१ ॥

उच्चं प्रांशून्नतं तुङ्गं निम्नं नीचं न्यगानतम् ।
विवरं कुहरं छिद्रं रन्ध्रं गर्तावटौ बिलम् ॥ ९२ ॥

विचालं त्वन्तरं मध्यमन्तरालं च मध्यमम् ।
अरालं कुटिलं वक्रं सरलं प्रगुणो ऋजु ॥ ९३ ॥

बृहद्विशालं विस्तीर्णं महच्च विपुलं पृथु ।
कठोरः कठिनो रूक्षो निष्ठुरः कर्कशः खरः ॥ ९४ ॥

---

85 B4 missing. –d) B2 वारं; B3 वापः. B1.2 गुणः for गणः.
86 B4 missing
87 B4 missing
88 B4 missing.
89 B4 missing. –c) B3 transp. स्तोकं and तुच्छं. –d) B2 लेशं.
90 B1.4 missing.
91 B1.4 missing.
92 B1.4 missing.
93 B1.4 missing. –a) B3 अंतरे.
94 B1.4 missing –After 94 ab, B3 adds: स्फारं गरिष्ठं विनथमूरू व्यूढं

तीव्रोग्रौ दारुणं घोरं दृढमुद्दाममुत्कटम् ।
सुकुमारः सुखस्पर्शः कोमलो मृदुलो मृदु ॥ ९५ ॥

सुन्दरं रुचिरं रुच्यं ×××× मनोहरम् ।
मनोज्ञं मञ्जुलं मञ्जु पेशलं वल्गु बन्धुरम् ॥ ९६ ॥

कान्तं रम्यं चारु हारि कमनीयं मनोरमम् ।
हृद्यं काम्यं रमणीयं प्रशस्तं साधु शोभनम् ॥ ९७ ॥

मुख्यः प्रधानः प्रवरो वर्योऽग्र्योऽग्रेसरोऽग्रणीः ।
प्रकृष्टश्च परार्ध्यश्च पुंगवः सत्तमः परः ॥ ९८ ॥

पौरस्त्यः प्रथमः पूर्व आदिराद्यादिमोऽग्रिमः ।
जघन्यः पश्चिमोऽन्त्यश्च पाश्चात्यश्चरमोऽन्तिमः ॥ ९९ ॥

पूतं पवित्रं मेध्यं च मलिनं च मलीमसम् ।
निर्णिक्तं क्षालितं धौतमुज्ज्वलं निर्मलं शुचि ॥ १०० ॥

समानं सदृशं ×× संकाशः संनिभः समः ।
अनुहारश्चोपमानं समकक्षा तुलोपमा ॥ १०१ ॥

समीपं निकटं पार्श्वं समयाभ्यर्णमन्तिकम् ।
उपकण्ठं संनिधानोपान्ते सविधसंनिधी ॥ १०२ ॥

विप्रकृष्टं परं दूरं ध्रुवं नित्यं च शाश्वतम् ।
चञ्चलं चपलं लोलं तरलं चटुलं चलम् ॥ १०३ ॥

वेल्लितं प्रेङ्खितं धूतमान्दोलितं च वीजितम् ।
दोला प्रेङ्खोलनं प्रेङ्खा हिन्दोलश्चापहिङ्खितम् (?) ॥ १०४ ॥

---

95 B1.4 missing.
96 B1.4 missing.
97 B1.4 missing.
98 B1.4 missing.
99 B1.4 missing.–b) B2 आद्य for आदि.
100 B1.4 missing.
101 B1.4 missing. B3 om. 101.
102 B1.4 missing.–a) B2 उपचर्यं for पार्श्वं.
103 B1.4 missing.
104 B1.4 missing.

संहनं मेदुरं सान्द्रं नीरन्ध्रं निबिडं दृढम् ।
प्रकटं तु स्फुटं स्पष्टं प्रकाशं व्यक्तमुल्बणम् ॥ १०५ ॥

त्वरितं सत्वरं शीघ्रं तूर्णं क्षिप्रं द्रुतं लघु ।
जवो वेगो रयो रंहस्तरो मन्दे तु मन्थरः ॥ १०६ ॥

अत्यर्थं निर्भरं तीव्रं गाढं बाढं दृढं भृशम् ।
पूरितं भरितं पूर्णं शून्यरिक्ताखिलोद्वसाः ॥ १०७ ॥

संकुलाकुलसंकीर्णाकीर्णसंबाधसंकटाः ।
परीतं निचितं व्याप्तं दिग्धलिप्ताक्तगुण्डिताः ॥ १०८ ॥

संपृक्तः खचितो मिश्रः संवलितः करम्बितः ।
आश्रितः सहितो युक्तः समवेतः समन्वितः ॥ १०९ ॥

सिद्धे निर्वृत्तनिष्पन्नौ निर्मितो विहितः कृतः ।
लब्धमासादितं प्राप्तं त्यक्तमुत्सृष्टमुज्झितम् ॥ ११० ॥

उरीकृतं प्रतिज्ञातमङ्गीकृतं प्रतिश्रुतम् ।
प्रस्थापितः प्रतिसृष्टः प्रहितः प्रेषितोऽपि च ॥ १११ ॥

रुद्धं तिरोहितं छन्नं छादितं पिहितावृते ।
उत्पाटितमुन्मूलितमुत्खातं भग्नमुद्धृतम् ॥ ११२ ॥

उक्तं जल्पितमाख्यातं भाषितं कथितोदिते ।
प्रतिकूलं विलोमं च प्रतीपं वाममेव च ॥ ११३ ॥

ज्ञातं बुद्धमवसितं विदितावगते अपि ।
व्यत्यासस्तु विपर्यासो वैपरीत्यं विपर्ययः ॥ ११४ ॥

---

105 B1.4 missing.
106 B1.4 missing.
107 B1.4 missing.–c) B3 पूर्णितं for पूरितं.–d) B3 om. रिक्ता.
108 B1.4 missing.
109 B1.4 missing.
110 B4 missing. B1 missing 110 ab.
111 B4 missing.
112 B4 missing.–a) B2 रुद्धः.
113 B4 missing. B3 om. 113 cd.
114 B4 missing. After st. 114, B3 adds: प्रतिकूलं विलोमं च प्रतीपं वाममेव च ।

प्रत्यादिष्टं प्रतिक्षिप्तं निरस्तं नुन्नमीरितम् ।
श्र(स्र)स्तं भ्रष्टं च प्रस्कन्नं पतितं गलितं च्युतम् ॥ ११५ ॥

अन्वेषितं गवेषितमन्विष्टं मार्गितं तथा ।
छेदितं खण्डितं कृत्तं छिन्नं लूनं छितं दितम् ॥ ११६ ॥

पाटितं दारितं भिन्नं विद्धे छिद्रितवेधितौ ।
बद्धो निगडितो नद्धः कीलितो यन्त्रितः सितः ॥ ११७ ॥

दग्धः प्रज्वलितः प्लुष्टो हेतिर्ज्वालाशिखार्च्चिषः ।
अङ्गारेङ्गालौ रक्षा तु भसितं भस्म भूतिवत् ॥ ११८ ॥

आर्द्रं तु स्तिमितं क्लिन्नं शुष्कमाश्यानीरसौ ।
निशितं तेजितं तीक्ष्णं कुण्ठितं वेगवर्जितम् ॥ ११९ ॥

वर्तुलं मण्डलं वृत्तं निस्तलं वलयाकृतिः ।
अस्रं कोटिरणिः कोणं प्रान्तं पर्यन्तमन्तवत् ॥ १२० ॥

संदेहः संशयो रेको निश्चयो निर्णयोऽपि च ।
तथा विश्रम्भविश्वासप्रतीतिप्रत्ययाः समाः ॥ १२१ ॥

आभेट्याडम्बराटोपाः व्यापप्रसरमूर्छनाः ।
आधारः स्यादवष्टम्भः स्यादालम्बनमाश्रयः ॥ १२२ ॥

स्वरूपं लक्षणं भावो रूपधर्मात्मरीतयः ।
सृष्टिः सर्गश्च निर्माणं करणं घटनं कृतिः ॥ १२३ ॥

जम्बूः प्लक्षः शाल्मलिश्च कुशः क्रौञ्चाभिधस्तथा ।
शाकद्वीपः पुष्कराख्यः सप्त द्वीपा इमे स्मृताः ॥ १२४ ॥

लवणक्षीरदध्याज्यसुरेक्षुस्वादुसागराः ।
भारताख्यं किंपुरुषं हरिवर्षमिलावृतम् ।
रम्यकाख्यं पञ्चमकं खण्डं षष्ठं हिरण्मयम् ॥ १२५ ॥

---

115 B4 missing.
116 B4 missing अन्वेषितं गवेषितं.
119 —b) B2 नीरसे.

कुरुखण्डं च भद्राख्यं केतुमालमिति स्मृतम् ।
एतानि नव खण्डानि जम्बूद्वीपविभागतः ॥ १२६ ॥

वीणावारणवाजिसिंहहरिणानङ्गप्रवालाचलाः
चन्द्रश्चातकचञ्चरीकजलमुक्चापासिवज्राह्वयः ।
हंसः कोकिलकेकिकीरगरुडः स्वर्णानिलार्कास्तमो
गुञ्जा श्रीफलपद्मदीपखटीकाः सारङ्गशब्दा इमे ॥ १२७ ॥

श्रीसिंहे च कपौ शुके हरिहरे चामीकरे भार्गवे
चन्द्रेभे कविराजवाजिवहने वंशे यमे पारदे ।
नागे वर्णसमीरणेऽपि दहने स्कन्दे च संक्रन्दने
मार्तण्डेऽशनिपन्नगेश्वरदिने खड्गे हरिः कीर्तितः ॥ १२८ ॥

अर्कमर्कटमण्डूकविष्णुवासववायवः ।
तुरङ्गसिंहशीतांशुयमाश्च हरयो दश ॥ १२९ ॥

दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु ।
भूमौ पशौ च गो शब्दो विद्वद्भिर्दशधा मतः ॥ १३० ॥

॥ इति श्रीसंकीर्णवर्गः ॥

ब्रह्मक्षत्रियविट्शूद्रसंकीर्णाख्यैर्मनोरमैः ।
वर्गैस्तृतीयः काण्डोऽयं पूर्णितो हर्षकीर्तिना ॥ १३१ ॥

श्रीमन्नागपुरीयकाह्वयतपागच्छाधिपाः सज्जपाः
सूरिश्रीप्रभुचन्द्रकीर्तिगुरवस्तेषां पदानुग्रहात् ।
भूपाभिज्ञजनोचितां लघुतरां श्रीनाममालामिमां
चक्रे पाठकहर्षकीर्तिरखिलां श्वेताम्बरग्रामणीः ॥ १३२ ॥

भूद्वीपवर्षसरिदद्रिनभःसमुद्र-
पातालदिग्ज्वलनवायुवनानि यावत् ।
यावन्मुदं वितरतो भुवि पुष्पदन्तौ
तावत्स्थिरा विजयतां बत नाममाला ॥ १३३ ॥

॥ इति श्रीशारदीयाख्यनाममाला संपूर्णा ॥

GLOSSARY

[*Figures indicate line-numbers*]

अ

अंश *m.* shoulder. 427

अंशु *m.* ray. 141

अंशुक *n.* garment. 468

अंशुमत् *m.* the individual soul. 400

अंशुमालिन् *m.* the sun. 128

अंहस् *n.* sin. 625

अंह्रि *m.* foot. 445

अंह्रिप *m.* tree. 282

अकूपार *m.* sea, ocean. 224

अक्त *p. p.* smeared. 878

अक्ष *n.* an organ of sense. 399

अक्ष *m.* die. 791

अक्षदेविन् *m.* gambler. 789

अक्षधूर्त *m.* gambler. 789

अक्षमा *f.* envy, jealousy. 536

अक्षवती *f.* gambling. 790

अक्षान्ति *f.* envy, jealousy. 536

अक्षि *n.* the eye. 419

अक्षौहिणी *f.* army. 705

अखिल *a.* all, whole. 838

अगदंकार *m.* physician. 646

अगम *m.* tree. 283

अगरु *m.* fragrant substance. 489

अगस् *m.* tree. 283

अगस्ति *m.* The sage Agasti. 152

अगोचर *m.* Brahman. 9

अग्नि *m.* fire. 331

अग्निभू *m.* N. of Kārttikeya. 67

अग्रजन्मन् *m.* brahmin. 669

अग्रणिन् *a.* chief. 857

अग्रिम *a.* first. 859

अग्रेसर *a.* foremost. 857

अग्र्य *a.* chief. 857

अघ *n.* sin. 625

अङ्क *m.* the lap. 437

अङ्क *m.* mark. 813

अङ्कपाली *f.* embrace. 512

अङ्ग *m.* body. 397

अङ्गज *m.* son. 381

अङ्गण्य(ण) *n.* court-yard. 500

अङ्गद *n.* armlet. 459

अङ्गना *f.* woman. 364

अङ्गरक्षिका *f.* armour. 713

अङ्गराग *m.* smearing. 467

अङ्गविक्षेप *m.* kind of dance or movement of the limbs. 568

अङ्गसंस्कार *m.* decoration of the body. 491

अङ्गहार *m.* kind of dance. 568

अङ्गार *m.* charcoal. 898

अङ्गारक *m.* the planet Mars. 146

अङ्गिका *f.* bodice. 476

अङ्गिरस् *m.* epithet of Bṛhaspati. 147

अङ्गीकृत *a.* accepted. 883

अङ्गुल *m.* thumb. 429

अङ्गुलि *f.* finger. 429

अङ्गुलीयक *n.* finger-ring. 460

अङ्गुष्ठ *m.* the thumb. 429

अचल *m.* mountain. 215

अचला *f.* the earth. 211, 916

अच्युत *m.* N. of Viṣṇu. 21

अज *m.* epithet of Brahman. 18

अज *m.* goat. 330

अजल्पन *n.* silence. 550

अजातशत्रु *m.* epithet of Yudhiṣṭhira. 743

अ[आ]जानेय *m.* species of horse. 312

अजिन *n.* hide (of an antelope). 672

अजिर *n.* court-yard. 500

अजिह्मग *m.* arrow. 720

अज्ञ *m.* fool. 594

अञ्चल *m.* the end of a garment. 469

अञ्जन *n.* black pig-ment. 455

अञ्जनाभ *a.* dark-blue. 827

अञ्जनीपुत्र *m.* N. of Hanūmān. 748

अटवी *f.* forest. 280

अट्ट *n.* upper storey. 501

अट्टालक *n.* upper storey. 501

अणि *f.* corner. 902

अणिमत् *m.* one of the eight powers of siddhis. 354

अणु *a.* small, little. 841
अण्डज *m.* bird. 197
अण्डज *m.* fish. 243
अत्यर्थ *a.* excessive. 875
अथर्वण *m.* the Atharvaveda, 648
अदभ्र *a.* plentiful, much. 843
अद्भुत *n.* wonder. 529
अद्भुत *m.* N. of a sentiment. 583
अद्रि *m.* mountain. 216
अधर *m.* lip. 424
अधर्म *m.* wicked person. 810
अधिक *a.* much, abundant. 843
अधिकाङ्ग *n.* military girdle. 712
अधिप *m.* lord. 680
अधिवासन *n* scenting with perfumes. 481
अधीति *f.* study. 638
अधोंऽशुक *n.* under-garment. 478
अधोक्षज *m.* N. of Viṣṇu. 31
अध्ययन *n.* study. 638
अध्यापक *m.* teacher. 596
अध्वग *m.* traveller. 691
अध्वन् *m.* way. 318
अध्वर *m.* sacrifice. 670
अन *m.* chariot. 314
अनङ्ग *m.* god of love. 57
अनङ्ग *m.* name of Kāmadeva. 916
अनड्वन् *m.* bull. 320
अनड्वाही *f.* cow. 322
अनन्त *n.* sky. 119
अनन्त *m.* N. of Śeṣa. 296
अनन्ता *f.* the earth. 211
अनन्यज *m.* god of love. 61
अनल *m.* fire. 331
अनादर *m.* disrespect. 616
अनिमिष *m.* fish. 244
अनिर्वृत्ति *f.* uneasiness, anxiety. 551
अनिल *m.* wind. 203
अनीकिनी *f.* army. 703
अनीकिनी *f.* army. 705
अनुकम्पा *f.* compassion. 525
अनुक्रोश *m.* compassion. 525
अनुग *m.* servant. 692
अनुग्रह *m.* favour. 526
अनुचर *m.* servant. 692
अनुजीविन् *m.* servant. 692
अनुनय *m.* conciliation. 562
अनुयोग *m.* inquiry. 564
अनुवादिन् *m.* parrot. 189
अनुहार *m.* similarity. 864
अनूचान *m.* one well-versed in the Vedas. 597
अनृजु *m.* wicked person. 810
अनृत *n.* falsehood. 626
अनेकप *m.* elephant. 309
अनोकह *m.* tree. 282
अन्त *m.* end, limit. 902
अन्तक *m.* N. of Yama. 110
अन्तराय *m.* obstacle. 814
अन्तराल *n.* middle part. 847
अन्तरिक्ष *n.* the sky. 118
अन्तरीय *n.* under-garment. 478
अन्तःकरण *n.* mind. 403
अन्तःपुर *n.* harem. 686
अन्तावसायिन् *m.* barbar. 777
अन्तिक *a.* near. 865
अन्तिम *a.* last. 860
अन्तेवासिन् *m.* pupil. 598
अन्तेवासिन् *m.* cāṇḍāla. 798
अन्त्य *a.* last. 860
अन्दुक *m.* chain. 813
अन्धकार *n.* darkness. 160
अन्धकारि *m.* N. of Śiva. 46
अन्धतमस *n.* darkness. 161
अन्धस् *m.* god. 73
अन्धु *f.* well. 249
अन्वय *m.* family, race. 388
अन्विष्ट *p. p.* searched, sought. 89
अन्वेषित *p. p.* searched for. 893
अपचिति *f.* worship, offering. 606
अपत्य *n.* offspring. 385
अपत्रपा *f.* bashfulness. 517
अपमानता *f.* disrespect. 617
अपराध *m.* fault. 544
अपर्णा *f.* N. of Pārvatī. 54
अपवरक *m.* inner apartment. 49
अपवर्ग *m.* final emancipation. 65
अपवाद *m.* censure, reproach. 61
अपहिञ्जित (?) *n.* swing. 870
अपाङ्गदर्शन *n.* side-glance. 420

मपान *n.* anus. 443
मप्पित्त *n.* fire. 333
मप्सरस् *f.* nymph. 99
मबला *f.* woman. 362
मब्ज *m.* the moon. 136
मब्ज *n.* lotus. 257
गब्जिनी *f.* lotus-plant. 261
मब्द *m.* year. 166
गब्धि *m.* sea, ocean. 225
गब्धिनन्दिनी *f.* N. of Lakṣmī. 50
गब्धिप *m.* N. of Agastya. 153
गब्धिमन्दिर *m.* epithet of Varuṇa. 107
गब्धिवल्लभा *f.* river. 230
गब्धिशायिन् *m.* N. of Viṣṇu. 29
गभिक *m.* husband. 372
भिख्या *f.* splendour, lustre. 494
भिजन *m.* family, race. 388
भिधा *f.* name. 618
भिधान *n.* name. 618
भिनय *m.* dramatic action. 568
भिप्राय *m.* opinion. 527
भिमान *m.* pride. 533
भिमानिन् *a.* proud. 811
भियोग *m.* effort. 817
भिलाष *m.* desire. 532
भिवादन *n.* bow. 602
भिषङ्ग *m.* jealousy. 536
भ्यर्ण *m. f. n.* near. 865
भ्यास *m.* practice, study. 818
भ्युत्थान *n.* rising in honour of 607
भ्र *n.* sky. 117
भ्र *n.* cloud. 173
मर *m.* god. 70
मत्र *n.* pot, vessel. 753
मर्ष *m.* anger. 535
मरावती *f.* N. of Indra's city. 89
मर्त्य *m.* god. 72
मृत *m.* god. 73
मृत *n.* nectar. 87
मृत *n.* water. 221
मृत *n.* final beatitude. 657
मृत *n.* milk. 762
म्बक *n.* the eye. 418
म्बर *n.* the sky. 118
म्बर *n.* garment. 468

अम्बा *f.* mother. 379
अम्बु *n.* water. 220
अम्बुज *n.* lotus. 257
अम्बुद *m.* cloud. 175
अम्बुभृत् *m.* cloud. 173
अम्भस् *n.* water. 220
अम्भोज *n.* lotus. 258
अम्भोजिनी *f.* lotus-plant. 261
अम्भोधर *m.* cloud. 175
अम्भोरुह *n.* lotus. 254
अम्ल *a.* sour. 820
अयन *n.* year. 162
अयन *n.* way, road. 319
अरण्य *n.* forest. 280
अरविन्द *n.* lotus. 253
अराति *m.* enemy. 702
अराल *a.* crooked. 848
अरि *m.* enemy. 700
अरुज् *m.* god. 74
अरुण *m.* the sun. 131
अरुण *a.* red. 822
अरुणानुज *m.* N. of Garuḍa. 193
अर्क *m.* the sun. 121
अर्चा *f.* worship. 606
अर्चा *f.* idol, image. 653
अर्चि *m. f.* flame. 897.
अर्चिस् *n.* ray. 142
अर्जुन *m.* Arjuna. 745
अर्जुनी *f.* cow. 323
अर्ण *m.* water. 220
अर्णव *m.* sea, ocean. 225
अर्थ *m.* wealth. 352
अर्थ *m.* motive. 645
अर्थिन् *m.* suppliant. 622
अर्दना *f.* asking, begging. 624
अर्द्ध *n.* half. 839
अर्धदृश् *f.* glance. 420
अर्भक *m.* child. 382
अर्यमन् *m.* the sun. 124
अर्वन् *m.* horse. 311
अर्हणा *f.* worship. 606
अर्हत् *m.* lord, god. 12
अलंकार *m.* ornament. 445
अलंक *m.* waist. (?) 438
अलक *m.* hair. 406

अलकापति *m.* epithet of Kubera. 106
अलक्तक *m.* red lac. 465
अलि *m.* bee. 268
अलिक *n.* forehead. 415
अलीक *n.* forehead. 415
अलीक *a.* false. 626
अल्प *a.* little. 840
अवगणना *f.* disrespect. 617
अवगत *p. p.* known, understood. 889
अवज्ञा *f.* disrespect. 616
अवट *m.* hole, cavity. 846
अवतंस *m.* ornament worn on the head. 449
अवदात *a.* white. 824
अवधि *f.* boundary. 559
अवनि *f.* the earth. 211
अवरोध *m.* harem. 686
अवर्णवाद *m.* reproach, censure. 614
अवलग्न *n.* the waist. 438
अवलिप्तता *f.* pride. 534
अवष्टम्भ *m.* support. 906
अवसर *m.* time. 543
अवसर्प *m.* spy. 690
अवसित *p. p.* known, understood. 889
अवहेला *f.* disrepect. 617
अवि *m.* ram. 329
अशन *n.* eating. 769
अशीला *f.* unchaste woman. 392
अशेष *a.* all, whole. 839
अश्मन् *n.* stone. 815
अश्व *m.* horse. 310
अश्ववार *m.* horse-man. 710
अश्वा *f.* mare. 313
अश्विनीपुत्र *m. du.* the physicians of gods. 94
अष्टपाद् *m.* the fabulous animal Śarabha. 305
अष्टमूर्ति *m.* N. of Śiva. 44
अष्टशल्या *f.* bed-stead. (?) 507
अष्टापद *n.* game-board. 791
अष्टापद *n.* gold. 347
अष्ठीवत् *m. n.* knee. 444
असती *f.* unchaste woman. 392
असत्य *n.* lie. 626
असि *m.* sword. 723
असित *m.* the planet Saturn. 1[illegible]
असित *a.* black. 826
असिधावक *m.* armourer. 780
असिधेनु *f.* knife. 722
असिपुत्री *f.* knife. 722
असुख *n.* pain, agony. 553
असुर *m.* demon. 113,115
असूया *f.* malice, envy. 536
असृज् *n.* blood. 788
अस्त्र *n.* weapon. 714
अस्वप्न *m.* god. 74
अस्पृश्य *m.* Cāṇḍāla. 798
अस्र *n.* blood. 788
अस्र *m.* corner, angle. 902
अहंकार *m.* pride. 533
अहन् *n.* day. 156
अहर्पति *m.* the sun. 130
अहर्मुख *n.* day-break, dawn. 1[illegible]
अहस्कर *m.* the sun. 123
अहि *m.* serpent. 290
अहिक *m.* N. of Ketu. 152
अहित *a.* disagreeable. 544
अहित *m.* enemy. 701
अहिप्रिय *m.* wind. 205
अह्निविकासभाक् *n.* lotus. 258

आ

आकल्प *n.* dress. 471
आक(का)रण *n.* invitation. 6[illegible]
आकाश *n.* sky. 117
आकीर्ण *a.* filled with. 877
आकुल *a.* filled with. 877
आकूत *n.* meaning, intentio[illegible]
आक्रोश *m.* curse. 557
आक्षेप *m.* censure, reproach
आखण्डल *m.* epithet of Indr[illegible]
आखेटक *m.* chase. 794
आख्या *f.* name. 618
आख्यात *p. p.* said. 887
आग *m.* fault. 544
आगम *m.* the Vedas. 636
आगार *n.* house. 497
आगू *f.* promise. 610
आग्नेयी *f.* south-east. 170
आचार *m.* custom. 628

चार्य *m*. teacher. 597
जि *m*. *f*. battle. 729
जीव *m*. livelihood. 754
ज्ञा *f*. order. 609
ज्य *n*. ghee. 763
ज्य *m*. N. of an ocean. 911
टोप *m*. pride, arrogance. 905
डम्बर *m*. pride, arrogance. 905
ढ्य *a*. rich. 758
तङ्क *m*. fear. 540
तङ्क *m*. disease. 814
तपत्र *n*. umbrella. 682
तपवारण *n*. parasol. 682
तोद्य *n*. musical instrument. 575
त्मज *m*. son. 381
त्मन् *m*. the individual soul. 400
त्मभू *m*. N. of Brahman. 19
त्मरीति *f*. nature. 907
दर *m*. respect. 607
दर्श *m*. mirror. 492
दि *a*. first. 859
दितेय *m*. god. 72
दित्य *m*. god. 70
दित्य *m*. the sun. 120
दिम *a*. first. 859
देश *m*. order. 609
द्य *a*. first. 859
धार *m*. support. 906
धि *f*. agony. 552
धोरण *m*. elephant-driver. 709
नक *m*. kettle-drum. 580
नत *a*. low. 845
नद्ध *n*. drum. 577
नन *n*. the mouth. 414
नन्द *m*. joy. 519
न्दोलित *a*. shaken, trembled. 869
न्वीक्षिकी *f*. logic. 650
प *m*. water. 222
पगा *f*. river. 229
पण *m*. market-place. 751
पणिक *m*. merchant. 749
पद् *f*. adversity. 759
पीड *m*. chaplet tied on the crown of the head. 449
[illegible]

आभरण *n*. ornament. 446
आभरण *n*. nose-ornament (?) 454
आभील *n*. injury, pain. 554
आमय *m*. disease. 814
आमिष *n*. flesh. 787
आमोद *m*. fragrance, perfume. 482
आम्नाय *m*. tradition. 611
आम्र *m*. mango-tree. 286
आयत *a*. long. 844
आयतन *n*. sanctuary. 652
आयास *m*. exertion, effort. 555
आयुध *n*. weapon. 714
आयुर्वेद *m*. physician. 647
आयोधन *n*. battle. 723
आर *m*. the planet Mars. 148
आरनाल *n*. gruel (= Mar. काञ्जी). 764
आरभट *m*. hero. 696
आरव *m*. sound. 641
आराधना *f*. service, devotion. 605
आराम *m*. grove. 278
आरोह *m*. woman's waist, the buttocks. 440
आर्ति *f*. distress. 554
आर्द्र *a*. wet. 899
आर्भटी *f*. pride, self-conceit. 905
आर्य *a*. respectable. 806
आर्यपुत्र *m*. husband. 373
आर्या *f*. N. of Pārvatī. 54
आलम्बन *n*. support. 906
आलय *m*. house. 498
आलिङ्गन *n*. embrace. 511
आली *f*. female companion (of a wamon). 395
आवर्त *m*. whirl-pool. 236
आवलि *f*. line, row. 837
आवाप *m*. bracelet. 461
आवास *m*. house. 496
आवृत्त *p.p*. concealed, hidden. 885
आशय *m*. meaning, intention. 527
आशा *f*. quarter. 168
आशीविष *m*. serpent. 294
आशुग *m*. wind. 205
आशुग *m*. arrow. 718
आशुशुक्षणि *m*. fire. 333
आश्चर्य *n*. wonder. 529
[illegible]

आश्रय *m.* house. 498
आश्रय *m.* support. 906
आश्रयाश *m.* fire. 335
आश्रव *m.* promise. 610
आश्रित *a.* accompanied. 880
आसन *n.* seat. 506
आसव *m.* wine, liquor. 786
आसादित *a.* obtained. 882
आसु *m. pl.* life. 802
आस्कन्दन *n.* battle. 729
आस्तिक *m.* pupil. 599
आस्थानी *f.* assembly. 685
आस्य *n.* the mouth. 414
आश्रप *m.* demon. 116
आहव *m.* battle. 728
आहार *m.* eating, food. 769
आह्वय *m.* name. 618.

इ

इक्षु *m.* N. of an ocean. 911
इक्षुरस *m.* unrefined sugar. 772
इङ्गाल (?) *m.* charcoal. 898
इच्छा *f.* desire. 532
इतर *m.* low man. 799
इत्वरी *f.* unchaste woman. 392
इन *m.* the sun. 128
इन *m.* lord 681
इन्दिन्दिर *m.* bee. 267
इन्दिरा *f.* N. of Lakṣmī. 50
इन्दीवर *n.* lotus. 263
इन्दु *m.* the moon. 135
इन्दुमौलि *m.* N. of Śiva. 48
इन्दुरुच् *f.* moon-light. 138
इन्द्र *m.* Indra. 77
इन्द्र *m.* lord. 681
इन्द्रपुत्र *m.* N. of Arjuna. 745
इन्द्राणी *f.* Indra's wife. 87
इन्द्रावरज *m.* N. of Viṣṇu. 28
इन्द्रिय *n.* organ of sense. 399
इभ *m.* elephant. 307
इभ्य *a.* rich. 758
इला *f.* the earth. 214
इलावृत *n.* one of the nine divisions of the earth. 912
इषु *m.* arrow. 718
इषुधि *m.* quiver. 717
इष्टगन्धि *m.* fragrance. 483
इष्वास *m.* bow. 715

ई

ईक्षण *n.* the eye. 418
ईरित *p.p.* said. 891
ईर्षा *f.* malice, envy. 536
ईश *m.* N. of Śiva. 40
ईशान *m.* N. of Śiva. 40
ईशानी *f.* the north-east. 171
ईशितृ *m.* lord. 681
ईशित्व *n.* one of the eight powers siddhis. 355
ईश्वर *m.* Lord. 681
ईश्वरा *f.* N. of Pārvatī. 52
ईश्वरी *f.* N. of Pārvatī. 51

उ

उक्त *p.p.* spoken, uttered. 887
उक्ति *f.* speech. 563
उक्षन् *m.* bull. 320
उग्र *m.* N. of Śiva. 38
उग्र *a.* dreadful. 851
उच्च *a.* high. 845
उच्चैःश्रवस् *m.* Indra's horse. 92
उच्छीर्षक *n.* pillow. 509
उज्जृम्भित *n.* full-blown flower. 275
उज्झित *a.* abandoned. 882.
उज्वल *a.* white. 824
उज्वल *a.* clean, clear. 862
उडु *f.* star. 139
उडुप *n.* raft. 241
उडुपति *m.* the moon. 136
उत्कट *a.* excessive. 851
उत्कण्ठा *f.* eagerness. 549
उत्कर *m.* heap, multitude. 835
उत्कलिका *f.* wave. 235
उत्कलिका *f.* anxiety, eagerness. 549
उत्खात *p.p.* uprooted, removed. 886
उत्तंस *m.* garland in the hand. 449
उत्तम *a.* the best. 805
उत्तमाङ्ग *n.* the head. 405
उत्तर *n.* reply. 564
उत्तरा *f.* the north. 171
उत्तराशापति *m.* epithet of Kubera. 1

उत्तरासङ्ग *m.* upper garment. 472
उत्तरीयक *n.* upper garment. 475
उत्तानपादज *m.* N. of Dhruva. 152
उत्पत्ति *f.* birth, origin. 801
उत्पल *n.* lotus. 262
उत्पाटित *p.p.* removed, uprooted. 886
उत्पाद *m.* birth. 801
उत्फुल्ल *n.* full-blown flower. 276
उत्सङ्ग *m.* the lap. 437
उत्साह *m.* effort, energy. 817
उत्सृष्ट *a.* abandoned. 882
उदश्वित् *n.* butter-milk. 764
उदक *n.* water. 221
उदधि *m.* sea, ocean. 223
उदन्त *m.* news, report. 560
उदन्या *f.* thirst. 770
उदन्वत् *m.* sea, ocean. 225
उदपान *n.* well. 249
उदय *m.* N. of a mountain. 914
उदयाद्रि *m.* N. of a mountain. 218
उदर *n.* the belly. 435
उदार *a.* liberal, munificent. 808
उदित *p.p.* spoken, uttered. 887
उद्दाम *a.* excessive. 851
उद्धृत *a. p.p.* uprooted, romoved. 896
उद्भव *m.* birth. 801
उद्यम *m.* business, effort. 817
उद्यान *n.* garden. 278
उद्योग *m.* business. 817
उद्वस *a.* empty. 816
उद्वह *m.* son. 380
उद्वाह *m.* marriage, wedding. 369
उद्वेग *m.* anxiety, sorrow. 552
उन्नत *a.* elevated, proud. 811
उन्मादन *m.* N. of one of the five arrows of Cupid. 64
उन्मिषित *n.* full-blown (flower). 275
उन्मूलित *p. p.* removed, uprooted. 886
उपकण्ठ *a.* near. 866
उपक्रोश *f.* censure, reproach. 614
उपगूहन *n.* embrace. 511
उपग्राह्य *n.* offering, present. 608
उपदा *f.* present. 608
उपदेष्टृ *m.* teacher. 596
उपधान *n.* pillow. 509
उपधि *f.* fraud, deceit. 537
उपबर्ह *n.* pillow. 509
उपमा *f.* comparison. 864
उपमान *n.* resemblance. 864
उपयाम *m.* marriage. 368
उपल *m.* stone. 815
उपलब्धि *f.* knowledge, intellect. 634
उपवन *n.* grove, garden. 279
उपवस्त *n.* fast. 630
उपवास *m.* fast. 630
उपस्थ *n.* the organ of generation. 441
उपहार *m.* offering. 606
उपांशु *m.* secracy. 542
उपाध्याय *m.* teacher. 596
उपानह् *f.* shoe. 796
उपान्त *a.* near. 866
उपायन *n.* present, gift. 608
उपालम्भ *m.* reproof. 558
उपासक *m.* worshipper. 599
उपासङ्ग *m.* quiver. 717
उपास्ति *f.* service, devotion. 605
उपेन्द्र *m.* N. of Viṣṇu. 24
उभय *n.* pair. 828
उमा *f.* N. of Pārvatī. 52
उमापति *m.* N. of Śiva. 43
उरग *m.* serpent. 291
उरण *m.* ram. 329
उरभ्र *m.* ram. 329
उरस् *n* bosom, breast. 433
उरीकृत *a.* accepted. 883
उरोज *m.* the female breast. 434
उर्वशी *f.* N. of an apsaras. 96
उर्वी *f.* the earth. 213
उल्बण *a.* clear, manifest. 872
उल्लोच *m.* awning. 510
उल्लोल *m.* wave. 236
उशनस् *m.* N. of Śukra. 149
उषण *a.* pungent. 820
उषर्बुध *m.* fire. 338
उषस् *f.* day-break, dawn. 157
उष्ट्र *m.* camel. 324
उष्ण *a.* hot. 145
उष्णरश्मि *m.* the sun. 127
उष्णीश *m.* turban. 471
उष्णीष *n.* crown. 448
उस्र *m.* ray. 141

ऊ

ऊढा *f.* wife. 376
ऊरु *m.* the thigh. 443
ऊरुपर्वन् *m. n.* knee. 444
ऊर्जस् *n.* vigour. 699
ऊर्ध्वलोक *m.* heaven. 76
ऊर्मि *f.* wave. 235
ऊर्मिका *f.* finger-ring. 460

ऋ

ऋक्थ *n.* wealth. 352
ऋक्ष *n.* star. 139
ऋग्वेद *m.* the Ṛgveda. 648
ऋजु *a.* straight. 848
ऋत *n.* truth. 627
ऋतु *m.* season. 162
ऋभु *m.* God. 74
ऋभुक्षन् *m.* N. of Indra. 84
ऋषभ *m.* a musical note. 569
ऋषि *m.* ascetic. 601

ए

एकदन्त *m.* epithet of Gaṇeśa. 6
एकपिङ्ग *m.* N. of Kubera. 104
एकान्त *n.* secrecy. 542
एडक *m* ram. 329
एण *m.* dear. 300
एनस् *n.* sin. 624

ऐ

ऐरावत *m.* Indra's elephant. 91
ऐरावती *f.* lightning. 177
ऐलविल *m.* N. of Kubera. 103
ऐश्वर्य *n.* prosperity. 353

ओ

{ओक *m.* house. 496
{ओकस् *n.* house. 496
ओघ *m.* flow. 237
ओघ *m.* multitude. 831
ओजस् *n.* vigour. 699
ओदन *n.* boiled rice. 767
ओषधीश *m.* the moon. 135
ओष्ठ *m.* the lip. 424

औ

औत्सुक्य *n.* eagerness. 549
औद्धत्य *n.* arrogance, pride. 534
और्व *m.* submarine fire. 341

क

कंधरा *f.* neck. 432
कंसारि *m.* N. of Viṣṇu. 32
क *m.* N. of Brahman. 19
ककुद्मत् *m.* bull. 321
ककुद्मती *f.* the hip. 439
ककुभ् *f.* quarter. 168
कक्ष *m.* forest. 279
कक्षापट *m.* cloth passed between the legs to cover the privities. 474
कङ्कट *m.* armour. 711
कङ्कण *n.* bracelet. 461
कङ्कपत्र *m.* arrow. 919
कङ्कबन्ध *n.* water (?) 222
कच *m.* hair. 406
कच्छप *m.* tortoise. 247
कच्छप *m.* N. one of the nine treasures (of Kubera). 356
कच्छा *f.* the hem of the lower garment tucked into the waistband. 473
कज *n.* lotus. 258
कज्जल *n.* black-pigment. 455
कज्जलध्वज *m.* lamp. 505
कञ्चुक *m.* bodice. 476
कञ्चुक *m.* armour. 712
कञ्चुकिन् *m.* attendant on women's apartment. 687
कञ्चुलिका *f.* bodice. 476
कटक *m.* bracelet. 461
कटक *n.* army. 703
कटाक्ष *m.* glance. 420
कटि *f.* the hip. 439
कटिसूत्र *n.* girdle. 463
कटीर *n.* the hip. 439
कटु *a.* pungent. 820
कटुक *a.* pungent. 820
कठिन *a.* harsh. 850
कठोर *a.* harsh. 850
कण *m.* small quantity. 840
कण्टक *m.* thrill, bristling of hair. 548

कण्टकाशन *m.* camel. 324
कण्ठ *m.* throat. 426
कण्ठसूत्र *n.* neck-ornament. 456
कण्ठाभरण *n.* neck-ornament. 456
कण्ठिका *f.* neck-ornament. 456
कण्ठीरव *m.* lion. 303
कथित *p.p.* told, expressed. 887
कदक *m.* awning. 510
कदम्बक *n.* multitude. 830
कदर्य *a.* miser. 760
कदली *f.* plantain tree. 287
कनक *n.* gold. 343
कनी *f.* girl. 384
कनीनिका *f.* pupil of an eye. 419
कन्तु *m.* god of love. 63
कन्दरा *f.* cave, valley. 673
कन्दर्प *m.* god of love. 59
कन्यका *f.* girl. 384
कन्या *f.* girl. 384
कपट *n.* deceit, cheating. 537
कपर्दिन् *m.* N. of Śiva. 45
कपालभृत् *m.* N. of Śiva. 41
कपि *m.* monkey. 327
कपिध्वज *m.* an epithet of Arjuna. 745
कपोल *m.* the cheek. 423
कमठ *m.* tortoise. 247
कमठी *f.* tortoise (female). 247
कमन *m.* god of love. 63
कमनीय *a.* charming. 855
कमल *n.* water. 222
कमल *n.* lotus. 253
कमलभू *m.* N. of Brahman. 18
कमला *f.* N. of Lakṣmī. 49
कमलालया *f.* N. of Lakṣmī. 49
कमलासन *m.* N. of Brahman. 19
कमलिनी *f.* lotus plant. 260
कम्प *m.* shaking, trembling. 552
कर *m.* ray. 140
कर *m.* the hand. 428
करक *m.* pomegranate tree. 287
करज *n.* finger-nail. 430
करटिन् *m.* elephant. 309
करण *n.* organ of sense. 399
करण *n.* making, effecting. 908
करणत्राण *n.* the head. 405
करभ *m,* camel. 324
करभूषण *n.* armlet. 459
करभूषण *n.* bracelet. 461
करम्बित *a.* mixed. 879
कररुह *m.* finger-nail. 431
करवाल *m.* sword. 723
करशाखा *f.* finger. 429
करशूक *m.* finger-nail. 431
करिन् *m.* elephant. 306
करुण *m.* N. of a sentiment. 582
करुणा *f.* compassion. 525
करेणु *m.* elephant. 309
कर्कश *a.* harsh. 850
कर्ण *m.* the ear. 416
कर्णग *n.* ear-ring. 450
कर्णजित् *m.* an epithet of Arjuna. 746
कर्णधार *m.* helmsman. 242
कर्णपूर *n.* ear-ring. 450
कर्णवेष्टक *n.* ear-ring. 453
कर्णेजप *m.* slanderer, villain. 809
कर्दम *n.* mud. 816
कर्पट *m.* ragged cloth. 474
कर्पूर *m.* camphor. 486
कर्बुर *n.* gold. 345
कर्बुर *a.* variegated. 827
कर्मकर *m.* servant. 693
कर्मसाक्षिन् *m.* the sun. 125
कर्षक *m.* cultivator. 773
कर्षू *f.* river. 229
कलकण्ठी *f.* cuckoo. 183
कलङ्क *m.* stigma. 812
कलत्र *n.* wife. 376
कलधौत *n.* gold. 345
कलम्ब *m.* arrow. 720
कलश *m.* jar. 775
कलह *m.* battle. 730
कलाद *m.* goldsmith. 776
कलानाथ *m.* the moon. 136
कलाप *m.* girdle. 462
कलाप *m.* bundle. 834
कलापिन् *m.* peacock. 181
कलि *m.* battle. 730
कलेवर *n.* the body. 397
कल्प *m.* N. of a heavenly tree. 98
कल्प *n.* a measure of time. 163

कश्प *m.* universal destruction. 167
कल्प *m.* rule. 628
कल्प *m.* ritual. 649
कल्पान्त *m.* universal destruction. 167
कल्मष *n.* sin. 624
कल्य *n.* day-break, dawn. 157
कल्यपाल *m.* distiller. 784
कल्याण *n.* gold. 346
कल्याण *n.* welfare. 658
कल्लोल *m.* wave. 235
कवच *n.* armour. 711
कवरी *f.* braid or fillet of hair. 409
कवि *f.* N. of Śukra. 149
कवि *m.* wise man. 589
कश्यपात्मज *m.* N. of Garuḍa. 194
कषाय *a.* astringent. 819
कष्ट *n.* pain. 553
कस्तूरिका *f.* musk. 487
कस्तूरी *f.* musk. 488
काकतुण्ड *m.* a kind of sandal (?). 489
काकपक्षक *m.* side-lock of hair on the temple of boys. 411
काकुत्स्थ *m.* an epithet of Rāma. 739
काकोदर *m.* serpent. 293
काकोल *m.* poison. 299
काक्ष *m.* glance. 420
काङ्क्षा *f.* desire. 531
काञ्चन *n.* gold. 343
काञ्चि *f.* girdle. 462n
काञ्ची *f.* girdle. 462
काञ्चीपद *n.* the hips and the loins. 439
काञ्जिक *n.* gruel. 764
काण्ड *m.* arrow. 718
कातर *m.* coward. 697
कात्यायनी *f.* N. of Pārvatī. 52
कादम्ब *m.* kind of swan. 192
कादम्बरी *f.* wine, liquor. 785
काद्रवेय *m.* serpent. 295
कानन *n.* grove. 278
कान्त *m.* lover, husband. 371
कान्त *a.* lovely, charming. 855
कान्ता *f.* wife. 375
कान्तार *m.* forest. 279
कान्ति *f.* lustre, beauty. 493
कान्दिशीक *m.* coward. 697
कापिशायन *n.* wine, liquor. 786
काम *m.* god of love. 57
काम *m.* desire. 532
कामकेलि *f.* sexual intercourse. 513
कामांकुश *m.* finger-nail. 430
कामिनी *f.* woman. 363
काम्बोज *m.* a species of horse from Kāmboja country. 312
काम्य *a.* charming. 856
काय *m.* body. 397
कारण *n.* cause. 643
कारु *m.* artisan. 783
कारूक *m.* artisan. 783
कार्तस्वर *n.* gold. 345
कार्त्तिकेय *m.* N. of Kārttikeya. 65
कार्मुक *n.* bow. 716
काल *m.* epithet of Yama. 110
काल *a.* black. 826
कालकूट *m.* poison. 298
कालिन्दी *f.* the river Yamunā. 234
काली *f.* N. of Pārvatī. 52
काव्य *m.* N. of Śukra. 149
काश्मीरजन्मन् *n.* saffron. 484
काश्यपी *f.* the earth. 212
काष्टतक्ष् *m.* carpenter. 779
काष्ठा *f.* quarter. 168
कासार *m.* lake. 251
किंकर *m.* servant. 692
किंनर *m.* demi-god. 99
किंनरेश *m.* epithet of Kubera. 102
किंपुरुष *n.* one of the nine divisions of the earth. 912
किंपुरुषाधिप *m.* N. of Kubera. 105
किंवदन्ति-न्ती *f.* report, rumour. 560
किकीदिवि *m.* kind of bird. 190
किङ्किणी *f.* tinkling ornament. 463
कितव *m.* gambler. 789
किरण *m.* ray. 140
किरात *m.* man of the Bhil tribe. 800
किरीट *n.* crown. 448
किल्बिष *n.* sin. 624
किशोर *m.* colt. 313
किशोरक *m.* child. 383
किसलय *m.* sprout. 273
कीचकारि *m.* epithet of Bhīma. 744

कीनाश *m*. N. of Yama. 112
कीर *m*. parrot. 189
कीर्ति *f*. fame. 613
कीलित *p.p*. tied, bound. 896
कु *f*. the earth. 213
कुक्कुर *m*. dog. 326
कुक्षि *f*. the belly. 435
कुङ्कुम *n*. saffron. 484
कुच *m*. the female breast. 434
कुज *m*. the planet Mars. 146
कुञ्ज *m*. bower. 280
कुञ्जर *m*. elephant. 306
कुञ्जविहारिन् *n*. N. of Viṣṇu. 36
कुट *m*. tree. 282
कुट *m. n*. house. 498
कुट्टिनी *f*. procuress, bawd. 390
कुठार *m*. axe. 726
कुण्ठ *a*. fool. 595
कुण्ठित *a*. blunted. 900
कुण्डल *n*. ear-ring. 453
कुण्डलिन् *m*. serpent. 293
कुतुक *n*. curiosity. 530
कुतूहल *n*. curiosity. 530
कुन्त *m*. spear. 725
कुन्तल *m*. hair. 406
कुन्द *m*. kind of flower. 285
कुन्द *m*, N. of one of the nine tresures (of Kubera). 357
कुबेर *m*. Kubera. 101
कुमार *m*. N. of Kārttikeya. 68
कुमार *m*. boy. 383
कुमारी *f*. girl. 384
कुमुद *n*. lotus. 262
कुमुदबान्धव *m*. the moon. 137
कुमुदिनी *f*. lotus. 264
कुमुदिनीपति *m*. the moon. 135
कुमुद्वती *f*. lotus. 264.
कुम्भ *m*. jar. 775
कुम्भकार *m*. potter. 775
कुम्भज *m*. epithet of Agasti. 153
कुम्भिन् *m*. elephant. 307
कुरङ्ग *m*. deer. 300
कुरल *m*. curl. 410
कुरुखण्ड *n*. one of the nine divisions of the earth. 914
कुर्कुट *m*. cock. 187
कुल *n*. family, race. 388
कुल *n*. collection, multitude. 835
कुलटा *f*. wanton woman. 392
कुलाल *m*. potter. 775
कुवलय *n*. lotus. 262
कुविन्दक *m*. weaver. 782
कुश *n*. water. 219
कुश *m*. one of the seven Dvīpas. 909
कुशल *m*. learned man. 591
कुशल *n*. welfare. 658
कुशेशय *n*. lotus. 253
कुसुम *n*. flower. 270
कुसुमायुध *m*. god of love. 61
कुह *m*. N. of Kubera. 103
कुहर *n*. hole, cavity. 846
कूट *n*. fraud, deceit. 537
कूट *n*. fraud. 626
कूट *n*. heap, multitude. 835
कूप *m*. well. 249
कूर *n*. boiled rice. 767
कूर्च *m*. beard. 412
कूर्पास *m*. kind of bodice. 476
कूर्म *m*. tortoise. 247
कूलंकषा *f*. river. 229
कूल *n*. bank. 238
कृकवाकु *m*. cock. 187
कृच्छ्र *n*. difficulty, trouble. 554
कृत *a*. accomplished. 881
कृतान्त *m*. epithet of Yama. 109
कृतान्त *m*. conclusion. 636
कृति *f*. making. 908
कृतिन् *m*. learned man. 589
कृत्त *p.p*. cut. 894
कृत्ति *f*. hide 672
कृत्तिवासस् *m*. N. of Śiva. 41
कृत्य *n*. motive. 643
कृत्स्न *a*. all, whole. 839
कृपण *a*. miser. 760
कृपा *f*. compassion. 525
कृपाण *m*. sword. 723
कृपाणिका *f*. knife. 721
कृपीटयोनि *m*. fire. 338
कृश *a*. small, little. 841
कृशानु *m*. fire. 336

कृशानुरेतस् *m.* N. of Śiva. 46
कृशोदरी *f.* woman (having thin waist). 367
कृषिकृत् *m.* cultivator. 773
कृषीवल *m.* farmer. 773
कृष्टि *m.* learned man. 590
कृष्ण *m.* N. of Viṣṇu. 21
कृष्ण *a.* black. 826
कृष्णवर्त्मन् *m.* fire. 332
कृष्णसार *m.* kind of deer. 301
कृष्णा *f.* epithet of Draupadī. 747
कृष्णागरु *m.* kind of sandal. 489
केकिन् *m.* peacock. 180
केतक *m.* *Ketaka* tree. 284
केतकी *f.* *Ketaka* tree. 284
केतन *n.* banner. 317
केतु *m.* the planet Ketu. 152
केतु *m.* flag. 317
केतुमाल *n.* one of the nine divisions of the earth. 914.
केदार *m.* field. 774
केयूर *m.* armlet. 459
केलि *f.* sport. 515
केश *m.* hair. 406
केशकलाप *m.* Mass of hair. 408
केशचय *m.* ,, 408
केशपाश *m.* ,, 408
केशभार *m.* ,, 408
केशरचना *m.* ,, 408
केशव *m.* N. of Viṣṇu. 21
केसरिन् *m.* lion. 302
कैटभजित् *m.* N. of Viṣṇu. 31
कैतव *n.* deceit, cheating. 537
कैतव *n.* gambling. 790
कैरव *n.* lotus. 262
कैरविणी *f.* lotus. 264
कैलासनाथ *m.* epithet of Kubera. 105
कैवर्त *m.* fisherman. 793
कैवल्य *n.* final beatitude. 657
कोक *m.* bird Cakravāka. 184
कोकनद *n.* (red) lotus. 259
कोकिला *f.* cuckoo. 182
कोटि *f.* corner. 902
कोटीर *n.* crown. 448
कोट्ट *m.* fort. 735
कोण *n.* corner. 902
कोदण्ड *n.* bow. 715
कोप *m.* anger. 535
कोमल *a.* tender. 852
कोल *m.* raft. 241
कोल *m.* hog. 325
कोविद *m.* learned man. 588
कोश *m.* store-house. 500
कोष *m.* store-house. 500
कौक्षेय *m.* sword. 724
कौतुक *n.* curiosity. 530
कौतूहल *n.* curiosity. 530
कौपीन *n.* cloth passed between the legs to cover the privities. 474
कौमुदी *f.* moon-light. 138
कौलीन *n.* scandal. 614
कौशिक *m.* N. of Indra. 84
क्रतु *m.* sacrifice. 670
क्रतुध्वंसिन् *m.* N. of Śiva. 43
क्रतुभुज् *m.* God. 74
क्रन्द *m.* cry. 546
क्रम *m.* foot. 445
क्रमण *m.* foot. 445
क्रमेलक *m.* camel. 324
क्रयविक्रयिक *m.* merchant. 750
क्रयाणक *n.* commodity. 753
क्रयिन् *m.* merchant. 750
क्रव्य *n.* flesh. 787
क्रीडा *f.* sport. 515
क्रीडासद्मन् *n.* bed-chamber. 503
क्रुध् *m.* anger. 535
क्रूर *m.* wicked person. 810
क्रौञ्च *m.* one of the seven Dvīpas. 909
क्रोड *m.* the lap. 437
क्रोध *m.* anger. 535
क्रोष्टु *m.* jackal. 328
क्रोष्ट्री *f.* female jackal. 324
क्रौञ्चभेदन *m.* N. of Kārttikeya. 67
क्लम *m.* fatigue. 555
क्लिन्न *a.* wet. 899
क्षण *m.* moment. 162
क्षण *m.* moment. 543
क्षणदा *f.* night. 159
क्षणरुचि *f.* lightning. 177
क्षतज *n.* blood. 788

क्षत्र *n.* man of the Kṣatriya caste. 674
क्षत्रिय *m.* Kṣatriya. 662
क्षपा *f.* night. 159
क्षमा *f.* the earth. 212
क्षमा *f.* forgiveness. 629
क्षय *m.* universal destruction. 167
क्षय *m.* house. 497
क्षान्ति *f.* forgiveness. 629
क्षाम *a.* little, small. 841
क्षार *m.* salt. 821
क्षालित *a.* washed, cleaned. 862
क्षिति *f.* the earth. 210
क्षितिपति *m.* king. 676
क्षितीश *m.* king. 677
क्षिप्र *a.* quick. 873
क्षीण *a.* small, little. 841
क्षीर *n.* water. 221
क्षीर *n.* milk. 762
क्षीर *m.* one of the seven seas. 911
क्षीरकण्ठ *m.* child. 383
क्षीरज *n.* curd. 762
क्षुद्र *m.* wicked person. 810
क्षुद्रघण्टिका *f.* tinkling ornament. 463
क्षुध् *f.* hunger. 770
क्षुधा *f.* hunger. 770
क्षुरप्र *n.* arrow. 720
क्षुरमर्दिन् *m.* barbar. 777
क्षुरिका *f.* knife. 722
क्षेत्र *n.* body. 396
क्षेत्र *n.* field. 774
क्षेत्रिन् *m.* cultivator. 773
क्षेम *n.* welfare. 659
क्षैरेयी *f.* dish prepared with milk. 765
क्षोणी *f.* the earth. 210
क्षोणीनाथ *m.* king. 677
क्षौम *n.* fine garment. 470
क्षौम *n.* terrace. 501
क्ष्मा *f.* the earth. 210
क्ष्माभृत् *m.* mountain. 215
क्ष्माभृत् *m.* king. 675
क्ष्वेड *m.* poison. 297

ख

ख *n.* sky. 118
ख *n.* organ of sense. 399
खग *m.* the sun. 121
खग *m.* bird. 195
खग *m.* arrow. 720
खचर *m.* bird. 198
खचित *p.p.* mixed. 878
खञ्जन *m.* wagtail. 190
खञ्जरीट *m.* wagtail. 190
खट्वा *f.* bed-stead. 507
खड्ग *m.* sword. 724
खण्ड *m.* candied sugar. 771
खण्डपर्शु *m.* N. of Śiva. 47
खण्डित *p.p.* cut, broken. 894
खर *a.* hot. 145
खर *m.* donkey. 325
खर *a.* harsh. 850
खर्जूर *n.* silver. 348
खर्व *a.* short. 844
खल *n.* villain. 809
खातक *n.* ditch. 250
खादन *n.* eating. 769
खिल *m. n.* vacuity, gap. 876
खुरली *f.* practice. 818
खेटक *m.* shield. 721
खेद *m.* grief, sorrow. 551
खेद *m.* fatigue. 555

ग

गगन *n.* sky. 117
गङ्गा *f.* the Ganges. 231
गङ्गाधर *m.* N. of Śiva. 39
गज *m.* elephant. 306
गजानन *m.* epithet of Gaṇeśa. 5
गजाराति *m.* lion. 304
गण *m.* multitude. 833
गणक *m.* astrologer. 644
गणाधिप *m.* epithet of Gaṇeśa. 6
गणिका *f.* harlot, courtezan. 391
गण्ड *m.* the cheek. 423
गति *f.* vehicle. 316
गद *m.* disease. 814
गदाधर *m.* N. of Viṣṇu. 33
गन्त्री *f.* car, chariot. 314
गन्ध *m.* fragrance, perfume. 482
गन्धधूली *f.* musk. 488
गन्धमादन *m.* N. of a mountain. 914

गन्धर्व *m.* Gandharva. 99
गन्धर्व *m.* horse. 311
गन्धर्व *m.* singer. 566
गन्धवह *m.* wind. 202
गन्धवाह *m.* wind. 202
गन्धसार *m.* sandal. 288
गभस्ति *m.* the sun. 127
गभस्ति *m. f.* ray. 141
गरल *n.* poison. 297
गरिमन् *m.* one of the eight powers or siddhis. 354
गरुडध्वज *m.* N. of Viṣṇu. 29
गरुडवाहन *m.* N. of Viṣṇu. 34
गरुत् *m.* wing. 199
गरुत्मत् *m,* Garuḍa. 194
गर्जा *f.* thunder. 178
गर्जित *n.* thunder. 178
गर्त्त *m.* hole. 846
गर्दभ *m.* donkey. 325
गर्भागार *m.* inner apartment. 499
गर्व *m.* pride. 533
गर्वित *a.* proud. 811
गर्विष्ठ *a.* proud. 811
गर्हणा *f.* reproach, censure. 615
गल *m.* the throat. 426
गलित *p.p.* fallen. 892
गल्ल *m.* the cheek. 423
गवाक्ष *m.* window. 504
गवेषित *p.p.* searched, sought. 893
गहन *n.* wood, forest. 280
गाङ्गेय *n.* gold. 344
गाढ *a.* excessive. 875
गात्र *n.* the body. 396
गान *n.* singing. 566
गान्धार *m.* a musical note. 569
गिन्दुक *n.* pillow. 509
गिरि *f.* mountain. 215
गिरिजा *f.* N. of Pārvatī. 54
गिरिधर *m.* N. of Viṣṇu. 34
गिरिश *m.* N. of Śiva. 40
गिरीश *m.* N. of Śiva. 40
गीत *n.* song. 565
गीत *n.* singing. 566
गीति *f.* singing, song. 566
गीर् *f.* Goddes of speech. 3
गीर्वाण *m.* God. 73
गीष्पति *m,* epithet of Bṛhaspati. 148
गुड *m.* unrefined sugar. 772
गुणवत् virtuous. 805
गुणिन् *a.* virtuous. 805
गुण्डित *a.* covered. 878
गुद *n.* the anus. 443
गुप्तपाद *m.* serpent. 294
गुरु *m.* the planet Jupiter. 147
गुरु *m.* teacher. 596
गुरुक्रम *m.* tradition. 611
गुह *m.* epithet of Kārttikeya. 65
गुहा *f.* cave. 673
गुह्यक *m.* N. of a class of demi-gods. 100
गुह्यकेश्वर *m.* epithet of Kubera. 102
गृह *n.* wife. 375
गृह *n.* house. 495
गृहमणि *m.* lamp. 505
गृहस्थ *m.* house-holder. 664
गृहिणी *f.* wife. 376
गृहिन् *m.* house-holder. 663
गेय *n.* singing. 566
गेह *n.* house. 498
गो *f.* heaven. 76
गो *m. f.* ray. 141
गो *f.* the earth. 214
गो *m.* bull. 320
गो *f.* cow. 322
गोकुल *n.* cow-house. 761
गोत्र *m.* mountain. 216
गोत्र *n.* family, race. 388
गोत्र *n.* name. 619
गोत्रभेदिन् *m.* N. of Indra. 88
गोत्रा *f.* the earth. 212
गोधि *f.* forehead. 415
गोधूम *m.* wheat. 752
गोप *m.* cow-herd. 761
गोपीप्रिय *m.* N. of Viṣṇu. 34
गोपुर *n.* city-gate. 736
गोप्तृ *m.* protector. 808
गोमायु *m.* jackal. 328
गोरस *m.* curds. 762
गोवर्धनधर *m.* N. of Viṣṇu. 33
गोविन्द *m.* N. of Viṣṇu. 21
गोशीर्ष *n.* sandal. 289, 485

ष्ठ *n.* cow-house. 761
ष्ठी *f.* assembly. 685
र *a.* white. 824
र *a.* yellow. 825
ारव *n.* respect. 607
री *f.* N. of Pārvatī. 51
रीसुत *m.* epithet of Gaṇeśa. 7
न्थ *m.* book. 637
न्थि *f.* knot of lower garment. 479
ह *m.* planet. 140
हण *n.* an organ of sense. 399
हपति *m.* the sun. 127
ाम *m.* scale in music. 572
ाम *m.* multitude, collection. 836
ाम *m.* village. 734
ाम्यधर्म *m.* sexual intercourse. 514
ीष्म *m.* the hot season. 164
ावन् *m.* stone. 815
ाहिन् *m.* suppliant. 622
ीवा *f.* the neck. 432
ैवेय *n.* neck-ornament. 456
लानि *f.* fatigue. 555
लौ *m.* the moon. 132

घ

घट *m.* jar. 775
घटन *n.* making, effecting. 908
घटी *f.* measure of time. 162
घन *m.* cloud. 172
घन *m.* the body. 398
घन *m.* club, mace. 725
घनरस *n.* water. 222
घनसार *m.* camphor. 486
घनाघन *m.* cloud. 172
घनाश्रय *m.* sky. 119
घर्म *m.* sweat. 547
घस्र *n.* day. 156
घुसृण *n.* saffron. 484
घृणा *f.* compassion. 525
घृणि *m.* ray. 142
घृत *n.* ghee. 763
घृतपक्व *n.* kind of cake. 766
घृतपू *f.* kind of sweetmeat. 766
घृताची *f.* N. of an apsaras. 95
घोटक *m.* horse. 310
घोणा *f.* nose. 41/
घोर *a.* lend. (?) 572
घोर *a.* dreadful. 851
घोरिणी *f.* line. 837
घोष *m.* cow-house. 761
घ्राण *n.* nose. 417
घ्राणतर्पण *m.* fragrance, perfume. 483

च

चकोर *m.* bird Cakora. 186
चक्र *m.* bird Cakravāka. 185
चक्र *n.* army. 703
चक्र *n.* collection, multitude. 83
चक्रधर *m.* N. of Viṣṇu. 33
चक्रपाणि *m.* N. of Viṣṇu. 23
चक्रबान्धव *m.* the sun. 127
चक्रवर्तिन् *m.* emperor. 679
चक्रवाक *m.* bird cakravāka. 184
